धिकोरविसुतेमेषादिराशिस्थिते ४४ यदुक्तमुडुनाथस्यफलंमेषादिराशिषु तद्दंशाकफलंचात्रपरिचिंत्यवदेद्बुधः ४५ दृष्टिफलं पापक्षितेगगन
गामिनिदुष्टरोगीजातः स्वधर्मगुणवित्तयशोविहीनः पापान्वितेनपरवित्तवधूविलोलः पारुष्यवाक्परबुद्धियुतोलसः स्यात् ४६ यदिशुभकरदृष्ट
खचरेजातमर्त्यः सुतधनयुतभोगीसुंदरोराजपूज्यः परिभवरहितः स्यात्सौम्यखेटोपयातेजितारिपुरिहधर्माचारवान्निंगितज्ञः ४७ चंद्रस्यदृष्टिफ
लं चंद्रेमेषगतेकुजादिखचरैर्नालोकितेभूपतिर्विद्वानराजसमः समस्तगुणवान्चोरोदरिद्रोभवेत् निस्वस्थनृपमान्यभूपधनिकप्रेष्याःवृषस्थेतथा राम
युग्मस्थेविकलोनृपः सुमतिमानधीरः खलोनिर्धनः ४८ कर्किस्थशशिनिक्षमासुतमुखैरालोकितेशौर्यवानार्यश्रेष्ठकविर्महीपतिरयोजीवीससेनत्राम २५
यः भूपः पंडितवाक्धनीनरपतिः पापीविभुः सिंहगे कन्यायांधनिकोविभुः प्रभसमोविद्वानविशीलः सुखी ४९ तौलिस्थेहिमगौवधादिशुभदैरालोकितेस्त

तक्रमद्रुभूपः स्वर्णकारो वणिक्कुजरविच्छायायामुतेः पंचकः कीटस्थे शशिनि द्विमातृपितृको राजप्रियो नीचकृद्रोगी निर्धनिको नृपालसचिवो दृष्टबुधादिग्रहैः
५० चन्द्रे धनस्थे शुभदृष्टियुक्ते विद्याधनज्ञानयशोबलाढ्यः दृष्टकुजादित्यदिनेशपुत्रैः सभाशठः पुण्यवधूरतः स्यात् ५१ राजा महीपतिर्विद्वान् धनी निर्धनि
को विभुः बुधादिग्रहसंदृष्टे मकरस्थे निशाकरे ५२ कुंभस्थिते निशानाथे शुभदृष्टे यशोधनः जातः परवधूलोलः पापखेटनिरीक्षिते ५३ मीनस्थे शुभवीक्षि
ते हिमकरे हास्यप्रियो भूपतिर्विद्वान् पापनिरीक्षिते परुषवाक् पापात्मको जायते पापांशे खलवीक्षिते शठमतिर्जातो न्यजायारतः सौम्यांशे शुभवीक्षिते हिम
करे जातो यशस्वी भवेत् ५४ राशिदृष्टिफलं यत्न दृशांकेषु च योजयेत् भवंति शुभदाः सर्वे शुभदृग्योगसंयुताः ५५ लग्नादिभावगतग्रहफलं मार्तंडो यदि लग्न
गोऽल्पतनयो जातः सुखी निर्घृणः स्वल्पाशी विकलेक्षणो रणतलप्राप्तो सुशीलो नरः ज्ञानाचाररतः सुलोचनयशाः स्यान्नत्रिकोणे गते मीनस्थो जनसंचितो ह
रिगते राज्यं धको वीर्यवान् ५६ क्षीणशशिन्युदये गबधिरो गहीनः प्रेष्यश्च पापसहिते नुगतायुरेव सोच्चस्वके धनयशो बहुरूपशाली पूर्णे तनौ यदि चिर
युरुर्पतिविद्वान् ५७ क्रूरः साहसिकोऽटनो तिचपलो रोगी कुजे लग्नगे विद्यावित्ततपःस्वधर्मनिरतो लग्नस्थिते बोधने जीवे लग्नगते निरायुरमलज्ञानी
धनी रूपवान् कामी कांतवपुः सदा रतनयो विद्वान् विलग्ने भृगौ ५८ दुर्नासिको वृद्धकलत्ररोगी मंदे विलग्नोपगते गहीनः महीपतुल्यः सुगुणाभिरामा
जातः स्वतनुगोपगते चिरायुः ५९ क्रूरो दयाधर्मविहीनशीलो राहौ विलग्नोपगते तु रोगी केतौ विलग्ने सरुजो तिलुब्धः सौम्यान्विते राजसमानभोगी ६० रवि
शशांकेऽप्यरिहा राजभोगाय संपदि स्थिरार्थपुत्रान् कुरुते मंदशात्रादयेऽग्निरवी ६१ द्वितीये त्यागी धातुद्रव्यार्जितो निष्ठाश्रुवाग्मी वित्तस्थानं गते चित्रभानौ का
मी कांतस्वाकृवाग्मी गतदोषाविद्याशीलोऽन्वितनानावित्तगेंदो ६२ धातुर्वादकृषिक्रियारनपरः कोपी कुजे वित्तगे बुध्योपार्जितवित्तशीलगुणवान् साधुः कुटुंब
बुधे वाग्मी भोजनसौख्यवित्तविपुलस्त्यागी धनस्थे गुरौ विद्याकामकलाविलासधनवान्वित्तस्थिते भार्गवे ६३ असत्यवादी चपलोऽटनो धनः शनौ कु
र [illegible] नंतवंचकः विशेषवान्वित्तगते विधुंतुदे जनापराधी शिखिनि द्वितीयगे ६४ अथ तृतीयं शूरो दुर्जनसंवित्तातिधनवान् त्यागी [illegible] तीयरवौ च

जा॰पा॰ द्रेसोदरराशिगेल्पधनिकोबंधुप्रियःसात्विकः ख्यातोपारपराक्रमोशठ प्रतिद्वेष्टिकयातेबुधे मायाकर्मपरोरनोतिचपलोदीनोनुजस्थेबुधे ६५ भा
२६ नुस्थानगतेगुरौगतधनःस्त्रीनिर्जितःपापकृत्तन्मुक्रमादरगसरोपन्नचनःपापोवधूनिर्जितः अल्पाशीधनशीलवंशगुणवान्भ्रातृस्थितेभानुजेराहो
विक्रमगेतिवीर्यधनिकःकेतौगुणीवित्तवान् ६६ मादरारातिगःशुक्रःशान्तोरोगभयप्रदः तत्रचशुभकारीस्यात्पुरतोयदिभास्करात् ६७ चतुर्थभावं हृ
द्रोगीधनधान्यवृद्धिरहितःक्रूरःसुखस्थेरवौनिद्यालीलसुखान्वितःपरवधूलोलश्चतुर्थेविधौ भौमेबंधुगतेतनुर्बंधुरहितःस्त्रीनिर्जितःशौर्यवान्बंधुस्थेश
शिजेविबंधुरमलज्ञानीधनीपंडितः ६८ वाग्मीधनीसुखयशोबलरूपशालीजातःशठ प्रशान्तिरिंद्र गुरौसुखस्थे स्त्रीनिर्जितःसुखयशोधनबुद्धिवि
द्यावाचालकोभृगुसुतेयदिबंधुयाते ६९ आचारहीनःकपटीचमानुत्के शान्वितोभानुसुतेसुखस्थे राहौकलत्रादिजनावरोधीकेतौसुखस्थेचपरापवा
दी ७० पंचमे राजप्रियश्चबलबुद्धियुक्तःप्रवासशीलःसुतगेदिनेशे मंत्रक्रियासक्तमनादरेंदुर्द्धनीमनस्वीतनयेसतीदो ७१ क्रूरोरनश्चपलसाहसि पा
कोविधर्मीभोगीधनीचयदिपंचमगेधराजे मंत्राभिचारकुशलःसुतदारवित्तविद्यायशोबलयुतःसुतगेसतिज्ञे ७२ मंत्रीगुणीविभवसारसमन्वितः
स्यादत्स्यात्मजःसुरगुरौसुतराशियाते सत्पुत्रमित्रधनवानतिरूपशालीसनातुरंगपतिराजजनेचशुक्रे मतश्चिरायुरसुखोचपलश्चधर्मीजातो
जितारिनिचयःसुतगेर्कपुत्रे भीरुर्दयालुरधनःसुतगफणीशेकेतौशठःसलिलभीरुरतीवरोगी ७३ षष्ठं कामीशूरोराजपूज्योभिमानीख्या
तःश्रीमानशत्रुयातेदिनेशे अल्पायुःस्यात्क्षीणचन्द्रेरिसंस्थेपूर्णेजातोतीवभोगीचिरायुः ७४ स्वामीरिपुक्षयकरःप्रबलोदराग्निःश्रीमान्य राम
शोबलयुतोवनिजेरिपुस्थे विद्याविनोदकलहप्रियकद्विशीलोनंधूपकाररहितःशशिजेरियाते ७५ कामीजितारिरबलोरिगतेमरेज्यशोका २६
पवादसहितोभृगुजेरिपुस्थे बव्हाशनोविषमशीलसपत्नभीतःकामाधनीरविसुतेसतिशत्रुयाते ७६ राहौरिपुस्थानगतेजितारिश्चिरायुरत्यंत
सुखीकुलीनः बंधुप्रियोदारगुणप्रसिद्धविद्यायशस्वीरिपुगेचकेतौ ७७ सप्तमभावे स्त्रीदुःखीमदनस्थितेदिनकरेतीवप्रकोपीखलश्चंद्रेकामग

तेदयालुरटनः स्त्रीवश्यको भोगवान् स्त्रीमूलप्रविलापको रणरुचिः कामस्थिते भूमिनेऽस्मिन् गः शिल्पकलाविनोदचतुरस्तारासुते संगते ७८ धीरश्चारुकलत्र
वान् पितृगुरुद्वेषी मदस्थे गुरौ वश्यः स्त्रीजनवल्लभश्च सुभगो भंगः सिते कामगे भाराध्वश्रमतप्तधीरधनिको मंदे मदस्थानगे गर्वी जारशिरोमणिः फणिपतौ का
मस्थिते रोगवान् ७९ अनंगभावोपगते तु केतौ कुदारको काविकलत्रभोगः निद्री विशीलः परदीनवाक्यः सदाटनो मूर्खजनाग्रगण्यः ८० अष्टमे मनोभिरा
मः कलहप्रवीणः पराभवस्थे च रवौ न तृप्तः रणोत्सुकस्त्यागविनोदविद्याशीलः शशांके सति रंध्रयाते ८१ विनीतवेषो धनवान् गणेशो महीसुते रंध्रगते तु जातः।
विनीतवाक्कल्पगुणप्रसिद्धो धनी सुधारश्मिसुतेऽष्टमस्थे ८२ मेधावी नीचकर्मा यदि दिविजगुरौ रंध्रयाते चिरायुर्दीर्घायुः सर्वसौख्यातुलबलधनिको भार्गवे
चाष्टमस्थे सुरोगेषाग्रगण्यो विगतबलधनो भानुजे रंध्रयाते राहौ क्लेशापवादी परिभवगृहगे दीर्घसूत्रश्च रोगी ८३ केतौ परदारंध्रगृहोपयाते जातः परद्रव्यव
धूरतेच्छुः रोषी दुराचाररतोऽतिलुब्धः सौम्येक्षिते नीवधनी चिरायुः ८४ नवमफलं आदित्ये नवमस्थिते पितृगुरुद्वेषी विधर्माश्रितश्चंद्रे पैतृकदेवकार्यनिरतस्त्या
गी गुरुस्थपदा भूसूनौ यदि पिश्यनिष्टसहितः स्यान्नः शुभस्थानगे सौम्ये धर्मगते तु धर्मधनिकः शास्त्री शुभाचारवान् ८५ ज्ञानी धर्मपरो नृपालसचिवो
जीवेऽस्मस्थानगे विद्यावित्तकलत्रपुत्रविभवः शुक्रे शुभस्थे सति मंदे भाग्यगृहस्थिते रणतलख्यातो विदारोऽधनी भाग्यस्थे भुजगे तु धर्मजनकद्वेषी यशोवित्त
वान् ८६ केतौ गुरुस्थानगते तु कोपी वाग्मी विधर्मोपरनिंदकः स्यात् शूरः पितृद्वेषकरो निडंभाचारो निरुत्साहरतोऽभिमानी ८७ दशमे मानस्थिते दिनकरे पितृवि
त्तशीलविद्यायशोबलयुतोऽवनिपालतुल्यः चंद्रो यदा दशमगो धनधान्यवस्त्रभूषावधूजनविलासकलाविलोलः ८८ मेषूरणस्थे वनिजे तु जाताः प्रतापवित
प्रबलप्रसिद्धाः व्यापारगे चंद्रसुते समस्तविद्यायशोवित्तविनोदशीलः ८९ सिद्धारंभः साधुवृत्तः स्वधर्मी विद्वानाढ्यो मानगे चामरेज्ये शुक्रे कर्मस्थानगे
कर्षकाच्च स्त्रीमूलाद्वा लब्धवित्तो विभुः स्यात् ९० मंदे यदा दशमगे यदि दंडकर्ता मानी धनी निजकुलप्रभवश्च शूरः चौरक्रियानिपुणबुद्धिरतो विशीलो
मानंगते फणिपतौ तु रणोत्सुकः स्यात् ९१ सुधीर्वली शिल्पविदात्मबोधी जनानुरागी च विरोधवृत्तिः कफात्मकः शूरजनाग्रगण्यः सदाटनः कर्मगते च

जा॰पा॰ केतौ ९२ लाभभावे भानौ लाभगते तु वित्तविपुलस्त्रीपुत्रदासान्वितः संतुष्टश्च विषादशीलधनिको लाभस्थिते शीतगौ आयस्थे धरणीसुते चतुरवा
२७ क्कामी धनी शौर्यवान् सौम्ये लाभगृहं गते निपुणधीर्विद्यायशस्वी धनी ९३ आयस्थे मरमे त्रिणि प्रबलधीर्विख्यातनामा धनी लाभस्थे भृगुजे सुखी पर
वधूलोलाटनो वित्तवान् भोगी भूपतिलब्धवित्तविपुलः प्राप्तिंगते भानुजे राहौ शास्त्रविनाशकोरणनलश्लाघी धनी पंडितः ९४ उपांत्ययाते शिखिनि प्र
तापी परप्रियश्चान्यजनाभिवंद्यः संतुष्टचित्तः प्रभुरल्पभोगी सुभक्तिपाचाररतः प्रजातः ९५ अथ व्ययं व्ययस्थिते पूषणि पुत्रशाली व्यंगः सुधीरःपति
तोटनः स्यात् चंद्रे व्ययाते तु विदेशवासी भौमे विरोधी धनदारहीनः ९६ बंधुद्वेषकरो धनी विगतधीर्लाभासुते रिःफगे वाक्चापलोटनः स्खलमतिर्जी
वे पद्मस्थं गते शुक्रे बंधुविनाशको व्ययगृहगे जारोपचारो धनी मंदे रिःफगृहं गते विकलधीर्मूर्खो धनी वंचकः ९७ विधुंतुदे रिःफगते विशीलसंपत्ति
शाली विकलश्च साधुः पुराणवित्तस्थितिनाशकः स्यात् बलाविशीलः शिखिनि व्ययस्थे ९८ स्वोच्चफलं उच्चस्थे दिननायके यदि धनी सेनापतिः शीतगौ
मिष्टान्नांबरभूषणः कृतनयो भूनंदने शौर्यवान् सौम्ये वंशविवर्द्धनो जनपतिर्द्धीमान् जितारिः सुखी जीवे वंशकरः सुशील चतुरो विद्वान्नृपालप्रियः ९९ शुक्रे
स्वोच्चगते विलासवनितासंगीतनृत्यप्रियो मंदे ग्रामपुराटवीक्षितिपतिर्जातः कुमारीरतः राहौ चोरजनाधिपः कुलवरः क्रूरः कुकर्मी धनी केतौ चोररतः सुहीन
धरणीपालप्रियो जायते १०० एकः स्वतुंगगः खेटो मित्रग्रहनिरीक्षितः जनयत्यवनीशं तं पूज्यं शास्यं सुहृत्सुतं १ तुंगस्थैकवियच्चरे बलयुते जातः स धन्यो
धनी सामंतः खचरद्वये त्रिषु यदा जातोवनीशो भवेत् उच्चस्थेषु चतुर्ग्रहेषु बलवान् केंद्रेषु भूपालराट् पंचव्योमचरेषु तुंगभवनं प्राप्तेषु लोकेश्वरः २ मूलत्रि राम
कोणगतफलं मार्तंडे यदि मूलकोणगृहगे जातो धनी वंदितश्चंद्रे वित्तसुखान्वितश्च रुधिरे कोपी दयावर्जितः ताराजे धनिकोतपी सुरगुरौ भोगी नृपाल २७
प्रियः शुक्रे ग्रामपुराधिपस्तरणिजे शूरः सुराहौ धनी ३ स्वक्षेत्रफलं स्वर्क्षे भास्वति चारुमंदिरदराचारोग्रकामी विधौ तेजो रूपधनी कुजे कृषिबलख्या
तो बुधे पंडितः जीवे काव्यकलागमश्रुतपरः शुक्रे मनस्वी धनी मंदे चंडपराक्रमागतसुखी राहौ यशोवित्तवान् ४ स्वजातिकस्याधिकपूज्यवित्तः धनाधि

कः क्ष्मापतितुल्यभूपः एकादिभिः स्वक्षेत्रगतैर्ग्रहेंद्रैर्जातः क्रमेणैव गणेन्मनुष्यः ५ मित्रक्षेत्रफलं मित्रक्षेत्रगते रवौ दृढसुहृद्दाता यशस्वी भवेत् तारेश
हृमानसौख्यधनिकोजातो धरानंदने वित्तागारसुहृत्प्रियः शशिसुते नानुर्यहास्याग्रणीर्जीवे शिष्टकृतः सिते सुतसुखी मंदे परान्नोधनी ६ स्थानः सुखी सुहृ
त्प्रीतस्मात्तु र्यगुणवान् सुधीः भोगीपरान्नभोक्ता च मित्रराशिफलं क्रमात् ७ परद्रव्योपभोक्ता स्यात्तर्कौ मित्रक्षेत्रगो ग्रहः द्वौ सुहृद्वित्तभोगी स्यात्तत्र यस्त्व
र्जितवित्तभुक् ८ सुहृच्चतुष्टये दाता गणपः पंचखेचराः चमूपः षट्ग्रहाः सप्तग्रहाः स्याद्धरणीपतिः ९ त्रिभिरुच्चगतैर्भूपस्त्रिभिर्मैत्रीस्वराशिगैः त्रिभि
रस्तंगते दासः त्रिभिर्नीचगते जडः १० शत्रुक्षेत्रगतफलं शत्रुक्षेत्रगते रवौ पितृसुखत्यागी च सेवापरः शीतांशौ यदि मातृदुःखनिरतो हृद्रोगशाली भवे
त् भूसूनौ विकलो कृतघ्नमलिनः सौम्ये सुखी पापधीर्जीवे भाग्यरतः सितेनु भृत्यको मंदे च शोकाकुलः ११ मिश्रराशियुगाः पंच षट्ग्रहा हीनसौख्यदाः ॥
सर्वे दुःखकराः सप्तमूढाः कुर्वंत्यशोभनं १२ नीचराशिफलं नीचस्थे दिननायके तु पतितो बंधुप्रसेवारतः शीतांशौ सरुजोऽल्पपुण्यधनवान् भौमेकृ
तघ्नोऽधनी क्षुद्रो बंधुविरोधकृच्छशिसुते जीवेऽपवादी खलः शुक्रे दुःखरतः शनौ गतधनः स्त्रीकोऽविपन्नः खलः १३ स्वपूर्वभावेषु फलं समग्रं त्रिकोणव
त्स्यात्फलमंशकेषु स्वराशितुल्यं सुहृदंशकेषु नीचारिमूढेष्वरिराशितुल्यं १४ होरायां स्वोच्चत्रिकोणस्वसुहृच्छत्रुनीचगृहार्कगैः फलं संपूर्णपादोनद
लपादाल्पनिष्फलं १५ केंद्रत्रिकोणगाः सर्वे शुभदा बलिनः शुभाः त्रिषडायगताः पापा बलिनो यदि शोभनाः १६ षट्पंचकत्रिचतुरक्षिविपच्चांद्रसंपर्के
जयुचरभावभवानि यानि तुंगादिकग्रहफलानि च कीर्तितानि प्रद्योतनप्रमुखखेचरप्रसादात् १७ ॥ इति श्रीनवग्रहकृपया वैद्यनाथविरचिते जा
तकपारिजाते ग्रहाश्रमफलाध्यायोऽष्टमः ८ ॥ मांद्याब्दादिफलानि वक्ष्ये गुलिके लग्नस्थिते मंदधीरोगी पापयुते तु वंचनपरः कामी दुराचारवान् वित्तस्थि
विषयातुरोऽटनपरः क्रोधी दुरालापवान् पापव्योमचरान्वितेन गतधनो विद्याविहीनोऽथवा १ विरहगर्वमदादिगुणैर्युतः प्रचुरकोपधनार्जनसंभ्रमः विगत
शोकभयश्च विसोदरः सहजधामनि मंदसुते यदा २ हिबुकभवनसंस्थे मंदजे वीतविद्याधनगृहसुखबंधुक्षेत्रयातोऽटनः स्यात् तनयभवनयाते मंदसूनौ

जा·पा· विशीलश्चलमतिरघबुद्धिः स्वल्पपुत्रोल्पजीवी ३ बहुरिपुगणहंता भूतविद्याविनोदी यदि रिपुगृहयाते मंदपुत्रेतु शूरः कलहकृद्दिनपौत्रे कामयाते
२८ कुदारः सकलजनविरोधी मंदबुद्धिः कृतघ्नः ४ विकलनयनवक्त्रः स्वल्पदेहोष्टमस्थे गुरुजनपितृहंता नीचकृत्योगुरुस्थे अशुभशतसमेतः कर्मगे
मंदसूनौ निजकुलहितकर्माचारहीनो विमानः ५ अतिसुखधनतेजोरूपवान् लाभयाते दिनकरसुतपुत्रे चाग्रजं हंति जातः विषयरहितवेषादीनवाक्यः
प्रवीणो निखिलधनहरः स्यान्मंदजे रिःफयाते ६ मांदित्रिकोणोपगते वित्तगंतं तदारशांशे यदि वा नवांशे मांद्यान्वितो मांदिसुतर्क्षनाथः सर्वे सदा निष्फला भ
वंति ७ संयुक्ते यदि भास्करेण गुलिके जातः पितृद्वेषको मातृक्लेशकरः सुशीतरुचिना भौमेन वीतानुजः सोन्मादी शशिजेन देवगुरुणा पाषंडको दूषकः शुक्रे
णप्रमदाकृतामयपदतो नीचांगनावल्लभः ८ जातः सौख्यरतस्तु मंदतनये मंदेन युक्ते यदा सर्पैर्वा विषमरस्तु शिखिना वह्निप्रदो जायते भिक्षुः स्याद्विषना
डियुक्तगृहगे भूपालकोपि ध्रुवं जातस्यापस्वगान्वितागगनगाः कुर्वंत्यनिष्टफलं ९ अथ संवत्सरफलानि प्रभवशरदि जातः साहसी सत्यवादी सकलगुणस
मेतः कालविद्धर्मशाली विभवशरदि कामी निर्मलो नित्यतुष्टः प्रबलधनसमेतो बंधुविद्यापशस्वी १० शुक्लाब्दे परदारको गतबलस्त्यागी मनस्वी भवेन्मंत्री
कार्यपरोतिभाषणपटुर्जातः प्रमोदृतके धर्मीदानपरायणः सुतधनः शांतः प्रजोत्पत्तिजो नीतिज्ञो निपुणः कृपालुरनिशं चागीरसाब्दे धनी ११ जातः श्रीमुखवत्स
रे परवधूलोलः शुचिर्वित्तवान् योगी राजकरो महाधनबलख्यातो भवाब्दे भवः लुब्धश्चलतधीः कृशामयतनुः क्रोधी युवाब्दे भिषक् जातो धातुभवोन्यदाररनिर
तः कार्योर्थवादी शठः १२ श्रीमानीश्वरवत्सरे बलमतिज्ञो नो गुणग्राहकः सत्कर्मी बहुधान्यवत्सरभवो भोगी वणिक्नृत्विवान क्रूरः पापरतः प्रमादिशरदि क्रोधी
विबंधुः सुखी जातो विक्रमवत्सरे यदि धनी सेनापतिः शौर्यवान् १३ वृषशरदि दरिद्रो वीतलज्जो विकर्मा दिनकरसमतेजोरूपवान् चित्रभानौ यदि निजकु राम
लविद्याचारधर्मः सुभानौ बहुधनबलशालीतारुणाब्दे विवेकी १४ जातः पार्थिववत्सरे नरपतिः श्रीमान् अतुल्यः सुखी कामी भीरुरशीलवित्तगुणवान्पा २८
पीव्ययाब्दे यदि वाग्मी सर्वजिदब्दके तिबलवानशास्त्रीगुणी तत्ववित्संपन्नो यदि सर्वधारिजनितः शिल्पी नृपालप्रियः १५ शोकी दुष्टपरोतिपापनिरतः क्रूरो

विरोध्यब्दके मायावी मदनातुरो विकृतिजो मंत्रक्रियातंत्रधीः निर्मोहो विगुणोतिदीनवचनः पापी खराब्दे खलः सर्वानंदकरो नृपप्रियकरो मंत्रार्थवित्नंद
ने १६ विजयशरदि धर्मी सत्यसंपन्नशीलो यदि जयशरदि स्याद्राजतुल्यो नृपो वा मदनरतिविलोलो मन्मथाब्दे जितारिर्गुणधनरहितः स्याद् दुर्मुखाब्दे वि
शीलः १७ दुष्टात्मा यदि हेमलंबिजनितः कृष्यादिकर्मोत्सुकः श्रीमान्विप्रजनाश्रितः फलपरित्यागी विलंब्यब्दके रोगी भीरुरवित्तवान् चलमतिर्नीचो विका
र्यब्दके शार्वर्यामतिवित्तभोगसुमनाः सत्यव्रताचारवान् १८ शांतोदारकृपाकरः प्लवभवः शूरः स्वधर्माश्रितो जातस्त्रीजनवंचितः शुभकृति प्राज्ञः शुभांगः
सुधीः ज्ञानी शोभकृतिः क्षितीशगुणवान् विद्याविनोदप्रियो दुर्भोगी परदारकः शठमतिः क्रोध्यब्दजः क्रोधयुक् १९ मानी हास्यरसप्रियो गुणधनश्लाघी च
विश्वावसौ दुष्टाचारपरः पराभवशरज्जातः कुलध्वंसकः कामी बंधुरतः प्लवंगजनितो बालप्रियो मंदधीर्देवाराधनतत्परोति सुभगः शौर्यान्वितः कीलके २०
शांतः सर्वजनप्रियोतिधनिकः सौम्याब्दजो धैर्यवान् नानाशास्त्रविशारदो विकलधीः साधारणाब्दे नरः आशालुश्च विरोधकृद्भवनरः क्रोधी दरिद्रोय
नो दुःशीलः परिधाविवत्सरभवः पारुष्यवाग्वित्तवान् २१ जातो बंधुविरागकृत्परवधूलोलः प्रमादी चगंभोदात्मा निखिलागमश्रुतिपरश्चानंदज
स्तत्त्ववित् पापी राक्षसवत्सरे यदि नृपालापोपकारी सतां दाता दानगुणान्वितोनलभवः शांतः सदाचारवान् २२ योगी पिंगलवत्सरे जितमना जात
स्तपस्वी भवेत्कालज्ञो यदि कालयुक्तिशरदि श्रीभोगसत्कर्मवान् सिद्धार्थी गुरुदेवभक्तिनिरतः सिद्धार्थिजातः सुधीर्जातो रौद्रसमुद्भवः कुटिलधीर्मानी
दुराचारवान् २३ कामी दुर्मतिवत्सरे जडमतिः शोकाभितप्तः खलः स्थूलांगः खरबाहुमस्तकतनुः स्याद् दुंदुभौ भोगवान् प्राज्ञः सत्यरतः सुखी च रुधिरोद्गार्य
ब्दजो वित्तवान् शांतो बंधुजनप्रियोतिसुभगो रक्ताक्षिजः शीलवान् २४ जातो जारः क्रोधनाब्दे कुमार्गी बंधुद्वेषी चौरनिष्ठारतः स्यात् शिष्टाचारः सुप्रसन्नः
सुरूपी मानी वीतारातिरोगः क्षयाब्दे २५ अथायनफलं उत्तरायणसमुद्भवः पुमान् ज्ञानयोगनिरतश्च नैष्ठिकः दक्षिणायनभवः प्रगल्भवान् भेदबु
द्धिरभिमानतत्परः २६ ऋतुफलं दीर्घायुर्धनिको वसंतसमये जातः सुगंधप्रियो ग्रीष्मर्तौ घननादसत्यचतुरो भोगी कृशांगः सुधीः क्षारक्षीरकटुप्रियः सुख

चनोवर्षर्तेजः स्वच्छधीः पुण्यात्मा सुमुखः सुखी यदि शरत्कालोद्भवः कामुकः २७ योगी कृशांगः कृषिकश्च भोगी हेमंतकालप्रभवः समर्थः स्नानक्रियादानरतः स्वधर्मी मा

नी यशस्वी शिशिरर्तुजः स्यात् २८ मासफलं चैत्रे सर्वकलागमश्रुतिपरो नित्योत्सवः श्रीरतो वैशाखे यदि सर्वशास्त्रकुशलः स्यात्तत्रिका भूपतिः ज्येष्ठमासि चिरायुरर्थतनयामंत्रक्रि
याकोविदश्चाषाढे तिधनी कृपालुरनिशं भोगी परद्वेषकः २९ जातः श्रावणमासि देवधरणीदेवार्चनेतत्परो नानादेशरतश्च भाद्रपदजस्तत्त्रीमनोराज्यवान् मासे चाश्वयुजि
स्वकीयजननविद्वेषी दरिद्रश्चलः पुंनागः कृषिका विशालनयनो वित्ताधिकः कार्त्तिके ३० सुरगुरुपितृभक्तो मार्गशीर्षे च धर्मी धनगुणबलशाली तुंगनासस्तु पुष्ये खलम
तिरतिधर्माचारवान् माघमासि प्रतिदिनमुपकर्ता फाल्गुने गानलोलः ३१ अथ पक्षफलं बलक्षपक्षे यदि पुत्रपौत्रधनाधिको धर्मरतः कृपालुः स्वकार्यवादी निजमा
तृभक्तः स्वबंधुवैरी यदि कृष्णपक्षे ३२ कालफलं जातः प्रत्युषसि स्वधर्मनिरतः सत्कर्मजीवी सुखी मध्याह्ने यदि राजतुल्यगुणवान् जातोपराह्णे धनी सायंकालभवः सुगं
धवनितालोलः खलात्मा रनो रात्रौ तत्फलमेव सौख्यबहुलः सूर्योदये जायते ३३ अथ तिथिफलं महोद्योगी जातः प्रतिपदि तिथौ पुण्यचरितो द्वितीयायां तनयः पशुबलयशोवि
त्तविपुलः तृतीयायां पुण्यप्रबलभयशीलश्च पटुवाक् चतुर्थ्यामाशालुस्त्वटनचतुरो मंत्रनिपुणः ३४ पंचम्यामखिलागमश्रुतिरतः कामी कृशांगश्चलः षष्ठ्यामल्पबली महीप
तिः समः प्राज्ञो तिकोपान्वितः सप्तम्यां कठिनो रुवाक् जनपतिः श्लेष्मप्रधानो बली चाष्टम्यामतिकामुकः सुतवधूलोलः कफात्मा भवेत् ३५ स्यात्तोदिव्यतनुः कुदारतनयः
य..मी नवम्यां तिथौ धर्मात्मा पटुवाक् कलत्रतनयः श्रीमान् दशम्यां धनी देवब्राह्मणपूजको हरितिथौ दासान्वितो वित्तवान् द्वादश्यामतिपुण्यकर्मनिरतस्त्यागी धनी पंडितः
३६ त्रयोदश्यां लुब्धप्रकृतिरतिकामी च धनवान् चतुर्दश्यां कोपी परधनवधूको गतमनाः आमायामाशालुः पितृसुरसमाराधनपरो धनी राकाचंद्रे यदि कुलयशस्वी च सुमनाः ३७
वारफलं मानी पिंगलकेशलोचनतनुश्चादित्यवारे विभुः कामी कांतवपुर्दयालुरनिशं शीतांशुवारोद्भवः क्रूरः साहसवादकार्यनिरतो भूसूनुवारे सदा देवब्राह्मणपूजकः सुवचनः सौम्य
वासरे यदि ३८ धन्वा भूपतिवल्लभश्च गुणवान् स्यात्तु गुरोर्वासरे धान्यसेत्र धनाश्रितः सितदिने सर्वप्रियः कामधीः मंदप्रायमतिः परान्नधनभुक् वादप्रवादान्वितो द्वेषी बंधुजनाव
रोधकुशलो मंदस्य वारोद्भवः ३९ नक्षत्रनामानि तुरंगदस्राश्वियुगश्विनीह याम्यमः कृतांतो भरणी च याम्यभं कृतांशनोग्निर्बहुला च कृत्तिका विधिर्विरिंचः शकटं च रोहिणी ४०
सौम्यश्चांद्रोग्रहायणमुडुपमृगशिरास्तारकारौद्रमार्द्रा चादित्यं तत्पुनर्वसु तिसुरजननंतिष्यपुष्यामरेज्याः आश्लेषाहिभुजंगः पितृजनकमघा फल्गुनीभाग्यभंस्यादर्यम्णश्चो

नरास्यंम्भगमितिकथितं भानुहस्तारुणाकौः ४१ त्वष्टा च चित्रा सुरवार्द्धकी तु स्वाती मरुद्वातसमीरणाख्याः वायुः समीरः पवनो विशाखा द्विदैवतं द्राग्निकसूर्यभानि ४२ अनू
राधा मैत्रं त्वथ कुलिशनाराशतमखः सुरः स्वामि ज्येष्ठा परमसुरमूलं क्रतुभृजः पयः पूर्वाषाढा सलिलजन्नतोयानि च समुत्तराषाढा विश्वं परमभिजिद्द्रुहमेनिगणाः ४३ श्राणावि
ष्णुहरिश्रुतिः श्रवणभान्याहुः श्रविष्ठा वसुपांचनाः शततारका वरुणभं चाजैकपादो जपान पूर्वप्रोष्ठपदस्यैकं परमहिर्बुध्न्युत्तराप्रोष्ठपात् पूषा रेवति पौष्णभानि मुनिभिः संकीर्तिता
नि क्रमात् ४४ गंडांततारः मूलाश्चासर्पयामेघाभुजगयाः पौष्णाश्वयाः संधिमं गंडांतं मद्वरप्रमाणमधिकानिष्टप्रदं प्राणिनां ज्येष्ठादान्त्यतारसंधिघटिका चाभुक्तसंज्ञा भवेत्तत्राद्यौ
प्रभवांगनासुतपशुप्रेष्याः कुलध्वंसकाः ४५ विभक्ताः स्युभिर्ज्येष्ठानक्षत्राखिलनाडिकाः आद्यंशो जननीमाता द्वितीये जननीपिता ४६ तृतीये जननीभ्राता यदि माता चतुर्थके
॥ पञ्चमे जाततनयः षष्ठे गोत्रविनाशकः ४७ सप्तमे चोभयकुलस्त्वष्टमे वंशनाशनं नवमे श्वशुरं हंति सर्वं हंति दशांशके ४८ भौमवासरयोगेन ज्येष्ठजा ज्येष्ठसोदरं भानुवा
सरयोगेन मूलजा श्वशुरं हरेत ४९ ज्येष्ठाद्यपादे प्रजमाग्रहन्याद्द्वितीयपादे यदि तत्कनिष्ठं तृतीयपादे पितरं निहंति स्वयं चतुर्थे मृतिमेति जातः ५० मूलाद्यपादे पितरं नि
हन्याद्द्वितीयके मातरमाशु हंति तृतीयजो वित्तविनाशकः स्याच्चतुर्थपादे समुपैति सौख्यं ५१ मूलर्क्षे निखिलानाड्यस्तिथिसंख्याविभाजिताः आद्ये पिता पितृभ्राता तृतीये भ
भगिनीपतिः ५२ पितामहश्चतुर्थे तु माता नश्यति पंचमे षष्ठे तु मातृभगिनी सप्तमे मातुलस्तथा ५३ अष्टमांशे पितृव्यस्तु निखिलं तु नवांशके दशमे पशुसंघातो भृत्यस्त्वे
कादशांशके ५४ द्वादशे तु स्वयं जातस्तन्येषु स्तुत्रपादशो चतुर्दशे तु गिनी त्वंते माता महस्तथा ५५ आश्लेषाद्येन गंडं स्याद्धनं गंडं द्वितीयके तृतीये मातृगंडं तु पितृगंडं चतु
र्थके ५६ मूला मघाश्विचरणे प्रथमे पितृश्च पौष्णेन्द्रयाश्च फणिनस्तु चतुर्थपादे मातुः पितुः स्ववपुषोपि करोति नाशं जातो यथा निशि दिने प्यथ संध्ययोश्च ५७ दिवाजा
तस्तु पितरं रात्रिजो जननीं तथा आत्मानं संध्ययोर्हंति नास्ति गंडविपर्ययः ५८ क्रूरग्रहस्योपरि भवेद्वात्रानादौ यदि दिने तथा संध्यासु क्रूरदृशां संधौ तु तदंत तद्गंडलक्षणं ५९ पूर्वाषा
ढेपनत्लग्ने जातः पितृविनाशकः पुष्ये कर्कटकान्त्यगे पितृमृत्युकरो भवेत ६० पूर्वाषाढे तु पुष्ये च पितरं मातरं सुतं मातुलं च क्रिशुहं हन्यात्प्रथमांशकतः क्रमात् ६१ उत्तराफाल्गु
नीतारा प्रथमे चरणे यदि तिष्यनक्षत्रमध्यस्य पादयोरुभयोर्यदि ६२ पादे तृतीये चित्रायाः पूर्वार्द्धे यमभस्य च तृतीयांशके तारायाश्चतुर्थौ शौक्त्यभस्य च ६३ जातस्तु पि
तरं हंति जातो चेन्मातरं तथा गंडकालः षोडशाद्यस्तु रंगाद्ये मघादौ चाष्टवर्गाः एकाब्दः शक्रतारायां चत्वारस्त्वाष्ट्रमूलयोः ६४ सार्पे वर्षे

मी॰पा॰ द्वयं चैवरेवत्यामेकवत्सरः द्वौमासौचोत्तरादोषः पुष्यर्क्षेतुत्रिमासकं ६५ नवमेमासिपितरंपूर्वाषाढोद्भवेहरेत् हस्तर्क्षेयदिजातस्तुपितरंद्वादशाब्दके
३० ६६ अभुक्तमूलजःपुत्रःपितरंहंतितत्क्षणात् अभुक्तमूलजनितोयदिजीवतिमानवः निजवंशकरःश्रीमानबहुसेनाधिपोथवा ६७ तिथिदोषः कृष्ण
पक्षेचतुर्दश्यांषडंशप्रथमेशुभं द्वितीयेपितरंहंतितृतीयेमातरंतथा ६८ चतुर्थेमातुलंहंतिपंचमेभ्रातृनाशनं षष्ठेयदिशिशुंहंतिगंडदोषइतीरितः॥
६९ अमायांतुप्रजातानांगजानांवाजिनांतथा गवांचमहिषादीनांमनुष्याणांविशेषतः ७० सिनीवालीप्रजातानांत्यागएवहिसर्वदा विशेषाच्चकुहू
ज्यानांशांतिंकुर्याद्विधानतः नारींविनावशेषाणांपरित्यागोविधीयते योगदोषः पितृजन्मर्क्षकर्मर्क्षे जातःपितृविनाशकः जन्मर्क्षांशकतत्लग्नजातःस
दामृतिप्रदः ७२ मुसलेमुद्गरेयोगेजातःशोभननाशकृत् विष्कंभरेदिद्रमाचष्टगुलिकंगविहीनवान् ७४ रिक्तायांषष्ठतोयातिपंगुःस्याद्यमकंटके ग्रहपीडितन
क्षत्रेजातोरोगनिपीडितः ७५ गृहमुक्तेकांक्षितर्क्षेदत्तपुत्रोभवेत्सुतः व्यतीपातेंगहीनःस्यात्परिघेमृत्युमाप्नुयात् ७६ वैधृतौपितरंहंतिविष्कंभेचार्थदानिकृत
॥शूलेतुशूलरोगीस्याद्गंडेगंडमवाप्नुयात् ७६ सदंतजातःकुलनाशकारीद्वितीयमासादिचतुष्टयांते दंतोद्भवोमृत्युकरःपितुःस्यात्षष्ठेशिशोस्तत्परतः
शुभंस्यात् ७७ जन्मतारादयः जन्मर्क्षमाद्यंदशमंतुकर्मसंघातिकंषोडशभंवदंति अष्टादशंस्यात्समुदायसंज्ञंआधानमेकोनितविंशतिःस्यात् ७८ त्रयो
विंशतिनक्षत्रंवैनाशिकमितिस्मृतं जातिदेशाभिषेकाख्याःपंचविंशादितास्मृताः ७९ जन्मताराद्यायस्यविद्धाःपापवियच्चरैः सद्योमृत्युकरास्तस्यशु
भैःशुभफलप्रदाः ८० गंडदोषापवादः वैशाखेश्रावणेमासेफाल्गुन्यांव्योमसंभवं आषाढपुष्यसौम्येषुज्येष्ठमासिचमानुषं ८१ अश्वयुक्चैत्रका
र्तिकेषुमाघेषुबिलसंभवं मर्त्येमृत्युर्गंडदोषःपातालेनास्तिपुष्करे ८२ जातमात्रेकुमारस्यमुखमालोकयेत्पिता पितृऋणात्सविमुच्येतपुत्रस्यमुखदर्श राम
नात् ८३ अथनक्षत्रफलं अश्विन्यामतिबुद्धिवित्तविनयप्रज्ञायशस्वीसुखीयाम्यर्क्षेविकलोन्यदाररनिरतःक्रूरःकृतघ्नोधनी तेजस्वीबहुलोद्भवःप्रभुस ३०
मोमृखोक्ष्वविद्याधनीरोहिण्यांपररंध्रवित्कृशतनुर्बोधीपरस्त्रीरतः ८४ चंद्रेसौम्यमनाटनःकुटिलदृक्कामातुरोरोगवान्आर्द्रायामटनश्चलोधिकबलः ५

सुदृक्क्रियाशीलवान् मृदात्मा च पुनर्वसौ धनबलः ख्यातः कविः कामुकः श्लिष्टे विप्रसुरप्रियः सधनधीराजप्रियो बंधुमान् ८५ सार्पे गूढमतिः कृतघ्नव
चनः कोपी कृताचारवान् गर्वी पुण्यरतः कलत्रवशगो मानी मघायां धनी पूर्वाफल्गुन्यां च फलः कुकर्मचरितस्त्यागी दृढः कामुको भोगी चोत्तरफल्गुनीभजनि
तो मानी कृतज्ञः सुधीः ८६ हस्तर्क्षे यदि कामधर्मनिरतः प्राज्ञोपकर्ता धनी चित्रायां मतिगुप्तशीलनिरतो मानी परस्त्रीरतः स्वात्यां देवमहीसुरप्रियकरो भोगी
धनी मंदधीर्गर्वी दारवशो जितारिरधिकक्रोधी विशाखोद्भवः ८७ मैत्रे सुप्रियवाक् धनी सुखरतः पूज्यो यशस्वी विभुर्ज्येष्ठायामतिकोपवान् परवधूसक्तो वि
भुर्धार्मिकः मूलर्क्षे पटुवाग्विधूतकुशलो धूर्तः कृतघ्नो धनी पूर्वाषाढभवो विकाररहितो मानी सुखी शांतधीः ८८ मान्यः शांतगुणः सुखी च धनवान् विश्वर्क्षे
जः पंडितः श्रोत्रायां द्विजदेवभक्तिनिरतो राजा धनी धर्मवान् आशालुर्वसुमान् वसूद्भुजनितः पीनोरुकंठः सुखी कालज्ञः शततारकोद्भवनरः शांतोल्पभु
क्साहसी ८९ पूर्वप्रोष्ठपदि प्रगल्भवचनो धूर्तो भयार्तो मृदुश्चाहिर्बुध्न्यजमानवो मृदुगुणस्त्यागी धनी पंडितः रेवत्यामुरुलांछनोपगतनुः कामातुरः सु
दरो मंत्री पुत्रकलत्रमित्रसहितो जातः स्थिरः श्रीरतः ९० राशिफलं मेषस्थे यदि शीतगौ चललघुभुक्कामी महोत्याग्रजो दाता कांतयशा धनोरुचरणः कन्या
प्रजो गोगतः दीर्घायुः सुरतोपचारकुशलो हास्यप्रियो युग्मके कामासक्तमनाटनः सुवचनश्चंद्रे कुलीरस्थिते ९१ सिंहस्थे पृथुलोचनः सुवदनो गंभीरह
ष्टिः सुखी कन्यास्थे विषयातुरो ललितवाग्विद्याधिको भोगवान् तौलिस्थे मरविप्रभक्तिनिरतो बंधुप्रियो वित्तवान् कीटस्थे शशिनि प्रमत्तहृदयो रोगी चल
ध्योटनः ९२ सौम्यांगो कविरक्षणः कुलवरः शिल्पी धनुःस्थे विधौ गीतज्ञः पृथुमस्तको मृगगते शास्त्री परस्त्रीरतः कुंभस्थे गतशीलवान् बुधजनद्वेषी च
विद्याधिको मीनस्थे मृगलांछने वरतनुर्विद्वान् बहुस्त्रीपतिः ९३ राश्यंशकफलं सेनानीर्धनवान् पिशंगनयनश्चारस्थमेषांशके पीनस्कंधमुखांसको
सितनवपुर्जातो वृषांशे विधौ चार्वंगः प्रभुसेवकोलिपिकरो युग्मांशके पंडितः श्यामांगः पितृपत्नसौख्यरहितश्चंद्रे कुलीरांशके ९४ पीनांगोच्चतनास्ति
कोधनबलः ख्यातश्च सिंहांशके कन्यांशे मृदुभाषणः कृशतनुर्धूतक्रियाकोविदः कामी भूपतिसेवकः सुनयनश्चंद्रे तुलांशस्थिते कीटांशे विकलो धनः कृ

जा॰पा॰ शतनुःसेवाटनोरोगवान् ९५ चापांशेकृशदीर्घबाहुतनुगस्त्यागीतपस्वीधनीलुब्धःकृष्णतनुःसुदारनयनश्चंद्रेमृगांशेयदि मिथ्यावादरतःस्वदारव
३१ शगःकुंभांशगेशीतगोमीनांशेमृदुलांगदीनवचनस्तीर्थाटनःपुत्रवान् ९६ योगफलं विष्कुंभेजितशत्रुरर्थपशुमान्प्रीतोपरस्त्रीवशश्चायुष्मानप्र
भवश्चिरायुररगदःसौभाग्यजातःसुखी भोगीशोभनयोगजोवधरः विजातोतिगंडेधनीधर्माचाररतःसुकर्मजनितोधृत्यांपरस्त्रीधनः ९७ शूलेकोपव
शानुगःकलहकृद्गंडेदुराचारवान्वृद्धौपंडितवाक्ध्रुवेतिधनवान्व्याघातजोघातुकः ज्ञानीहर्षणयोगजःपृथुयशावज्रेधनीकामुकःसिद्धौसर्वजना
श्रितःप्रभुःसमोमायीव्यतीपातजः ९८ दुष्कामीचवरीयजस्तुपरिघेविद्वेषकोवित्तवान्शास्त्रज्ञःशिवयोगजश्चधनवान्शांतोवनीशप्रियः सिद्धेधर्म
परायणःक्रतुपरःसाध्येशुभाचारवान्चार्वंगः शुभयोगजश्चधनवान्कामातुरःश्लेष्मकः ९९ शुक्लेधर्मरतःपटुत्ववचनःकोपीचलःपंडितोज्ञानीब्रह्म
भवोतिगुप्तधनिकस्त्यागीविवेकप्रभुः ऐंद्रेसर्वजनोपकारचरितःसर्वज्ञधीवित्तवान्मायावीपरदूषकश्चबलवान्त्यागीधनीवैधृतौ १०० करणफ
लं बवकरणभवःस्याद्बालकृत्यःप्रतापीविनयचरितवेषोबालवेराज्यपूज्यः गजतुरगसमेतःकौलवेचारुकर्मामृदुपटुवचनःस्यात्तैतिलेपुण्यशी
लः १ गरजकरणजातोवीतशत्रुःप्रतापीवणिजनिपुणवक्ताजारकांताविलोलः निखिलजनविरोधीपापकर्मापवादीपरिजनपरिपूज्योविष्टिजातः
स्वतंत्रः २ कालज्ञःशकुनोद्भवःस्थिरसुखीजातस्त्वनिष्टाकारःसर्वज्ञश्चचतुष्पदेतुललितप्रज्ञायशोवित्तवान् नागस्त्रीवसुमानतीवबलवान्वाचा
लकोनागेकिंस्तुघ्नपरकार्यकृच्चपलधीर्हास्यप्रियोजायते ३ लग्नफलं बंधुद्वेषकरोटनःकृशतनुःक्रोधीविवादप्रियोमानीदुर्बलजानुरस्थिरधनःशूर राम
श्चमेषोदये गोमानुन्देवगुरुद्विजार्चनरतःस्वल्पात्मजःशांतधीर्विद्यावादरतोटनश्चसुभगोगोलग्नजःकामुकः ४ भोगीबंधुरतोदयालुरधिकःश्रीमान् ३१
गुणीतत्त्वविद्यागात्मासुजनप्रियोतिसुभगोरोगीचयुग्मोदये मिष्टान्नांबरभूषणोललितवाक्कापट्यधीर्धर्मवान्जातःस्थूलकलेवरोन्यभवनप्रीतः
कुलीरोदये ५ जातःसिंहविलग्नकेल्पतनयःसंतुष्टधीर्हिंसकःशूरोराजवशीकरोजितरिपुःकामीविदेशंगतः कन्यालग्नभवःक्रियासुनिपुणःश्री

मानृसुधीपंडितोमेधावीवनिताविलासरसिकोबंधुप्रियःसात्विकः ६ ललितवदननेत्रोराजपूज्यश्चविद्वानूमदनमतावलोलःस्वाधनक्षत्रशाला
॥विरलदशनमुख्यःशांतबुद्धिर्विषादीचलमतिरतिभीरुर्जायतेनोलिलग्ने ७ मूर्खःक्रूरविलोचनोतिचपलोमानीविरार्थैर्धनीविद्वानवृश्चिकलग्नजश्च
सुजनद्वेषीविषादप्रियः मातुश्चापविलग्नजःकुलवरःश्रीमान्यशोवित्तवानाकोकरसमुद्भवश्चरमणीलोलःशठोदीनवाक् ८ अंतःशठःपरवधूरति
केलिलोलःकार्पण्यशीलधनवानघटलग्नजातः मीनोदयेल्परतिरिष्टजनानुकूलस्तेजोबलप्रचुरधान्यधनश्चविद्वान् ९ होराफलं ओजराशौ
भानुहोराप्रजातःक्रूरःकामीवित्तवान्राजपूज्यः वाग्मीदाताचारुदेहोदयालुर्जोरस्त्रीकश्चंद्रहोरापदिस्यात १० मार्तंडहोराजनितःसमंक्षेमंत्रीक
तज्ञश्चपलोतिभीरुः चंद्रस्यहोराप्रभवःप्रगल्भवाक्योनसःपुण्यवपूरतःस्यात ११ द्रेक्काणफलं कंठीरवाजघटकीटमृगावनायामीनालिसिंहव
णिगात्यगताद्दगाणाः क्रूराभवंतिकटकस्यसरीसृपस्यम्यस्थितस्यव्रदृशःप्रवदंतिसंतः १२ कुलीरमीनालिगतोदृगाणोमीनांगनामंदिरमध्यगो
च गोयुग्मयोरंत्यगतत्रिभागोभवंतिषट्तोयचराद्दगाणाः १३ मेषाश्विगोकुंभमृगद्विनीयस्तुलाधरस्त्रीयुगपूर्वभागाः चापांगनातोयधरांत्यभागाद
गाणसंज्ञाःप्रभवंतिसौम्याः १४ मृगाजकर्कंत्यगताद्दगाणावृषस्यचापस्यचपूर्वयातो नृयुग्मतौलीहरिमध्यमास्तविमिश्रसंज्ञादतिसंवदंति १५ क्रूरद्रेक्का
णजातःखलमतिरटनःपापकर्मापवादीदाताभोगीदयालुःकृषिसलिलधनस्तोयभोगविशीलः सौम्यद्रेक्काणजायःसुखधनतनयश्चारुरूपोदयालु
र्वोतोमिश्रकुशीलःपरयुवतिरतःक्रूरदृष्टिश्चलात्मा १६ नवांशफलं मार्तंडांशेखलात्माबलसुतधनवान्पिंगलाक्षःकामीचंद्रांशेभोगशालीपरयु क्ष
वतिरतःपंडितोगोधनाढ्यः भौमांशेक्रूरकर्माचलमतिरटनःपित्तरोगीचलुब्धस्त्यागीरागीबुधांशेललिततनुरतिख्यातविद्यायशस्वी १७ जीवांश
यदिहेमकेशतनुगःश्रेष्ठःसुधीरूपवानमंत्रीपंडितवाक्प्रसन्नवदनोराजाधिराजप्रियः शुक्रांशेपरकामिनीजनरतस्त्यागीसुखीपंडितोमंदांशे
यदिपापबुद्धिरधनःस्थूलद्विजोरोगवान् १८ द्वादशांशफलं जातोमेषद्वादशांशेखलात्माचारःपापाचारधर्मानुरक्तःस्त्रीवित्ताढ्योरोगवानुष्ठ

जा॰ पा॰ भांशे युग्मांशेनुद्यूतकृत्यः सशीलः १९ दुष्टाचारः कर्कटांशे तपस्वी सिंहे भागे राजकृत्यः सशूरः द्यूताचारस्त्रीरतः कन्यकांशे व्यापारी स्यान्तौलिभां
३२ शे धनाढ्यः २० कीटांशके वधकृच्चिविर्टचोरनाथश्चापांशके पितृमहीसुरदेवभक्तः सस्याधिपो मृगमुखांशभवः सभृत्यः कुंभेखलस्त्वनिमिषे धनि
कश्च विद्वान् २१ त्रिंशांशफलं त्रिंशांशेधरणीसुतस्य चपलः काठिन्यवाक्क्रूरधीर्मंदस्याटनतत्परो मलिनधीर्जीवांशके वित्तवान् सौम्यांशे गुरुदे
वभक्तिनिरतः साधुप्रियो बंधुमान् कामी कांतवपुः सुखी च भृगुजस्त्रिंशांशके जायते २२ वेलाफलं वाग्मी शिष्टाचारधर्मस्तपस्वी नित्यान्नादी निर्मलो
दानशीलः तेजोविद्यारूपवान् सत्यवादी वीताराातिः सत्ववेलाप्रजातः २३ रजोवेलाजातः सुखधनयशोरूपबलवान् जिताराातिः कामातुरमतिर्बंधु
प्रियमनाः तमोवेलाजातः परधनवधूकामगतसुखः शठः स्वामीबंधुद्विजगुरुविरोधी चपलधीः २४ तमःसत्वरजोवेलास्तमःसत्वरजस्तमाः भवंत्यर्क
दिनादीनामर्धयामैरनुक्रमात् २५ कालहोराफलं मंत्री मंगलमार्तंडशुक्रेंदुशनैश्चराः आरभ्यवारतो होरा रात्रौ पंचमवारतः २६ क्लेशायासः
संपदः शोकरोगं विद्यावित्तं सर्वसंपत्प्रभुत्वं जायासौख्यं वित्तनाशं दिनेशाज्जातस्यैतत्कालहोराफलं स्यात् २७ मार्तंडसूनुतनयाश्च भावज्ञानि
संवत्सरायनमुखप्रभवाखिलानि होरादिवर्गजनितानि फलानि यानि संकीर्तितानि रविमुख्यवरप्रसादात् २८ ॥ इति श्रीनवग्रहकृपया वैद्यनाथ
विरचिते जातकपारिजाते नवमोऽध्यायः ९ ॥ अथाष्टकवर्गः चक्रं विलिख्य सहलग्नदिवाकराद्यैः सूर्यादिलग्नभवनांत वियच्चराणां वाक्याष्टकोप
गतवर्णनियोजिताभ्यैर्भिन्नाष्टवर्गजनिताखिलबिंदवः स्युः १ देवौंधवौंधींगौंवधौंस्तमौंरमौंधृलिं क्रमादुस्तकरादिबिंदवः सौलोलसंख्यासमुदायबिं
दवः सर्वाष्टवर्गः समुदायसंज्ञकः २ मेषादियत्र ग्रहगता वसुसंख्यया तास्तत्र वपुष्टिबलवृद्धिकरा भवंति षट्पंचसप्तसहितानि शुभप्रदानि त्रिद्व्येक राम
बिन्दुयुतभानि न शोभनानि ३ मिश्रफलं भवति सागरबिंदुयोगे रोगापवादभयदायदिशून्यभावाः एकादिबिंदुयुतभानुमुखग्रहाणां भिन्नाष्टवर्गजनिसर्वं ३२
फलं प्रवक्ष्ये ४ करोति नानाविधरोगदुःखभयाटनादीनि च सैकबिंदुः द्विकोवनस्तापनृपालचोरकृत्यापवादाशननाशनानि ५ त्रिकस्त्वसंचारकृ

शावलंबकलेवरव्याकुलमानसानि सुखासुखार्थव्ययवित्तलाभफलप्रदः सागरविंदुकः स्यात् ६ सद्वस्त्रलाभसुतलालनसाधुसंगविद्याधनानिकुरुते
तिसपंचबिंदुः षट्बिंदुकस्तुनवमोहनरूपशीलसंग्रामजिद्धनयशोबलवाहनानि ७ सप्तसप्तबिंदुस्तुरगादियानसेनाधनप्रभवशोभनानि बिंद्वष्टकः सप्त
गुणाभिरामराजप्रतापप्रकटीकरोति ८ शरादिबिंदुस्थितराशियातस्वकीयवर्गे शुभदस्तुनित्यं अतोन्यथाचेदफलप्रदाता गोचारतः शून्यफलप्रमादी ९
स्वोच्चमित्रादिवर्गस्थाः केंद्रादिबलसंयुताः अनिष्टफलदाः सर्वेस्वल्पबिंदुयुतायदि १० दुष्टस्थानस्थितायेचयेचनीचारिभांशगाः तेसर्वेशुभदानित्यम
धिबिंदुयुतायदि ११ दिनेशमुख्यग्रहवर्गकेषु यदाशनिः शून्यगृहं प्रयातः करोतिपित्रादिकभावजानां अतीवरोगारिभयाकुलानि १२ लग्नंगतेदिनकरेरि
पुनीचभागेजातः कृशानुयुगबिंदुयुतेचरोगी बाणादिबिंदुसहितोदयगंदिनेशे स्वोच्चेथवानिजगृहेनृपतिश्चिरायुः १३ केंद्रत्रिकोणोपगतेदिनेशेषट्पंच
सप्ताष्टकबिंदुवर्गे रुद्रामलानीलचलाब्दकेषुजातस्यवातज्जनकस्यमृत्युः १४ शोध्यावशिष्टद्वयबिंदुयातेकेंद्रस्थितेसंदशनींदुसूनो भानोर्दशाब्दात्पर
तः समृद्धानातस्यराज्यश्रियमाहुरार्याः १५ चन्द्रफलं शून्यागारंतरणिशशिनोरष्टवर्गेतदीयं मासेराशिः सकलशुभदं कर्मणित्याज्यमाहुः यस्मालस्य
शशिनितनुगसेकलोकाग्निबिंदौसप्तत्रिंशाब्दरिमरणंद्वित्रिखेदान्वितेच १६ केंद्रत्रिकोणायगतेशशांकेनीचारिगेवृद्धिकलाविहीने बिंदुद्विकेवा
यदिसत्रिबिंदौतज्जभवनाशं कथयंतितज्ज्ञाः १७ वेदादिबिंदुयुतकोणचतुष्टयेवालाभविधोबलयुतेयदिभाववृद्धिः बिंद्वष्टकेशशिनिकेंद्रगतेतुजा
ताविद्यायशोधनबलप्रबलानरेंद्राः १८ कुजफलं स्वोच्चस्वकेगृहसुखोदयमानयातेबिंद्वष्टकेचयदिकोटिधनप्रभुःस्यात् चापाजसिंहमृगकीट
विलग्नसंस्थेभौमेचतुष्टयफलोपगतेचराजा १९ बिंद्वष्टकेधरणिजेतिलघुस्थितांशामानथवातनुगंतचमहीपतिःस्यात् जातावनीशकुलजोयदिदे
शनाथःस्वोच्चःस्वराशिसहितेनृपचक्रवर्ती २० बुधफलं केंद्रत्रिकोणवसुबिंदुकतज्जजातोयविद्याधिकभाग्यशाली स्वोच्चादिकेकद्वितयत्रिबिंदौत
ज्ञावद्धिर्नेच्चभावहानिः २१ विद्याधिकंयत्तदागारमासविद्यारंभःसर्वविद्याकरःस्यात् गोचारेणज्ञस्यशून्यालयस्थेमंदंबंधुज्ञातिसंपद्विनाशः २२॥

गुरुफलं जीवाष्टवर्गाधिकबिंदुराशौ लग्ने निषेकः कुरुते सुतार्थी तद्राशिदिग्भागगृहस्थितानि गोवित्तयानानि बहूनि च स्युः २३ जीवाष्टवर्गे लघुबिंदु
गृहोपयाते भानौ कृताखिलशुभानि विनाशितानि पंचादिबिंदुकरिपुव्ययरंध्रगे ज्ये जातस्त्विरायुरतिवित्तजितारिकः स्यात २४ स्वोच्चेथवा निजगृहे वसु
बिंदुयुक्ते केंद्रस्थिते सुरगुरौ गुरुभावगे वा नीचारिभावमपहाय विमूढराशौ जातः स्वकीयपशता पृथिवीपतिः स्यात २५ यदा महीदेवकुलप्रजाता
तदीययोगेन नरपालतुल्यः कृतानि पुण्यप्रभवप्रसिद्धबुद्धिमतापानि गुणाभिरामाः २६ ससप्तबिंदौ सहलक्ष्मणेन जीवबहुस्त्रीधनपुत्रवंतः षट्बिंदुके
वाहनवित्तवंतः संपच्चबिंदौ जयशीलवंतः २७ शुक्रफलं साष्टबिंदुफलकोणकेंद्रगे भार्गवे नृपसवाहनाधिपः आयुरंतमविनाशभागवान् वित्तरत्नभु
विरादिबिंदुके २८ नीचास्तारिःफनिधनोपगते तु काव्ये पूर्वोदितक्षितिपयोगविनाशनं स्यात् शुक्रोल्पबिंदुयुतमंदिरदिग्विभागे स्त्रीवश्यदेहतुशय
नोपगृहं प्रशस्तं २९ शनिफलं कोणस्य शून्यतरराशिगते तु मंदे जातस्य मृत्युफलमाशुधनक्षयो वा एकद्वित्रिकयुतबिंदुयुते च केंद्रे मुक्तः स्वतुंगभ
वने रविजेल्पमायुः ३० षट्पंचबिंदुसहिते तनुगे बलाढ्ये जन्मादिदुःखबहुलं धननाशमेति मंदे शरादिफलनीचसपत्नभावजातास्थिरायुरतिशोभनव
र्गके दौ ३१ मृदादिनीचगृहगे शरवेदविंदौ दासुष्टपित्तसहितास्तनयेन तुस्त सारेषु बिंदुगणितेपर मंत्रतंत्रग्रामाधिपास्तु गिरिबिंदुगृहे धनाढ्याः ३२ प्रस्ता
रकवर्गः आलिख्य चक्रं नव पूर्वरेखा याम्यान्तरस्याद्दश च त्रिरेखाः प्रस्तारकं षस्म वनि प्रकोष्ठं पंक्त्याष्टकं चाष्टकवर्गजं स्यात ३३ होराशशी बोधनशुक्र
सूर्यभौमाम रेंद्रार्चितभानुपुत्राः याम्यादिपंक्त्याष्टकराशिनाथाः क्रमेण तद्बिंदुफलप्रदाः स्युः ३४ सबिंदुगः सर्वफलप्रदः स्याद्विंदुकोयद्यफलप्रदः स्यात॥
अरातिनीचास्तगतो नभोगः सबिंदुकोपि प्रविलापकर्ता ३५ त्रिकोणशोधना पंचप्राचीरालिखेद्दाणसंख्यास्तिर्यग्रेखावर्जितात चतुष्काः प्रागादीशाद्द्वा
दशव्योमबाणा ज्योतिश्चक्रस्वामिनस्तूबरायाः ३६ अजहरितुरगांगे रुसकन्यामृगस्थेयुगधटघटरूपेः कर्किकौ
टावसानैः दिनकरमुखवर्गे तत्रकोणोपयाना लघुतरसमशून्या बिंदकः शोधिताः स्युः ३७ त्रिकोणभावेषु यदल्पबिन्दवस्तदीयविंदूभवतस्तुतावुभौ नबिन्दु

कोयस्तु न शोधितेतेरौ समानसंख्याय दि सर्वमुत्सृजेत ३८ एकाधिपत्यशोधना कंठीरवंकरकभंचविना कुलीरादिकायाम राशियुगलोपगबिंदुसंख्याः॥
ततुल्यशून्यविषमाग्रसहग्रहायास्त्वेकाधिपत्यपरिशोधितशेषिताःस्युः ३९ शशिद्वयं सयुचरं नशोधयेदकंद्वयाःशून्यभमप्यशोधयेत फलाधिकेस्व
टयुतंपरंत्यजेत तुलानभोगहितयंपरित्यजेत ४० खेटापयातेलघुबिंदुराशौ तत्तुल्यमापाति तदन्यसंख्याः पूर्वैत्रिकोणपरिशोध्यपश्चादेकाधिपत्यस्यत
तःप्रकल्प्याः ४१ शोध्यावशिष्टानि गुणीकृतानि मेषादिभागेगुणकंद्दिभानां सूर्यादिकास्तेगुणिताःस्वमानैः पिंडग्रहाणांगुणकंवदंति ४२ शैलाशावसु
सागरांबरशरैःशैलाहिगोसायकैरीशद्वादशभिश्चराशिगुणकैर्मेषादिभानांक्रमात बाणैःपंचभिरष्टकैःशरनभःशैलेषुभिर्भास्वरादेर्वेव्योमतलाधि
वासगुणकैरायुर्विधानादितैः ४३ तद्राशिखेटगुणकैकफलानि हृत्वात्रिंशाड्भिरब्दचयमासदिनादिकाःस्युः तद्द्वादशाधिकसमायदि राशिमानेराह
त्यतत्क्रमतयानहोरेतदायुः ४४ उच्चगतस्यद्विगुणंतदायंनीचंगतस्यास्तगतस्यचार्द्धं अतीतरात्रेत्वनुपातमायुरारस्यवक्रेद्विगुणीकृतंस्यात ४५ मू
लत्रिकोणनिजतुंगगृहोपगानांतुंगादिवर्गस्थभंगागनिराशितानां उक्तप्रकारगणितागममायुरेवपापारिवर्गसहितस्यविपादमायुः ४६ रविमुख्यन
भोगदत्तसंख्याःपरमायुःशरदस्तुमानवानां सविलग्नसमाश्चकेचिदाहुर्गुरुमूलात्समुपेतितत्स्वमायुः ४७ केंद्रादन्यगतेचंद्रेसखेटचाष्टवर्गजे आयुरव
नभःस्थानेषुभपापयुतेथवा ४८ रव्यादिखेटस्थितराशिपानाःस्वकीयवर्गोपगबिंदुसंख्याः वदाष्टवर्गप्रभवायुरब्दाभवंतिसंवेहरणक्रियाश्च ४९
मंदेवेनाशिकनक्षत्राणि नतत्कारकभावबिंदुगुणितंशोध्यावशिष्टंफलंविंशत्यामहृमसमभिक्षविहृतंतत्क्षपतारांशनो तातस्तज्जननीसहोदरज
नोंबधुःसुतस्त्रीस्वयंतत्तुल्याविलयंप्रयांतिविपुलश्रीनाशंहतुस्ववा ५० एवंभिन्नाष्टवर्गः॥ अथसमुदायाष्टवर्गः॥ ततःसमालिख्यभगोलचक्रंसमस्त
बिंदुस्थितिराशिकोष्ठे रव्यादिकानामजपूर्वकाणांबिंदूपगस्थानफलंवदामि ५१ आपंचविंशतिफलान्यफलान्यसत्यमात्रिंशदक्षसहितानिसमध्यमानि त्रिं
शात्परणिसुखवितयशस्कराणितद्भावदृद्धिफलदानिचसामुदाय ५२ यत्तुंगराशिस्वसुहृद्गृहस्थोयकोणकेंद्रोपचयस्थितास्च यसौम्यवर्गादिबलोपयातास्तना

ता॰पा॰ शादाल्लाघवबिंदुकाश्चेत् ५३ पंचावसानरिपुरंध्रतुरंगभानोयनीचपापरिपुखेचरवर्गयुक्ताः यस्मादिग्राशिपतिनासहबाधकाश्चेत्सर्वेसुखफलदास्त
३८ थिबिंदुकाश्चेत् ५४ मानस्थिताल्लाभगृहेवहुत्वेन्नाभात्लघुत्वेयदिरिःफराशौ रिःफापयातादधिकेविलग्नेजातःसुखीवित्तयशोबलाढ्यः ५५ खंडत्रयः
शफरकर्कटकीटकाद्यस्तत्तच्चतुष्टयगृहोपगबिंदुयुक्तं आद्यंचमध्यमवसानमितिप्रयुक्तंकेचिद्वयादिकमितिप्रवदंतिलोकाः ५६ बिंदुत्यक्तारिःफरंध्राप
यानेशिष्टःखंडःकेचिदिच्छंतिसंतः तुल्यस्तुल्याधिक्यबिंदुक्रमेणमिश्रंदुःखंसमंपदस्युर्नराणां ५७ सौम्याक्रांतेयदिसुखकरंमिश्रदंमिश्रयोगेखंडेपाप
हिचरमदितेक्लेशयोगाकरंस्यात् बिंदुस्त्वल्पेयदिमनस्तापवान्पापवादीबिंद्वाधिक्येचवसिविपुलःश्रीसमेतःप्रजातः ५८ यावद्विंदोलग्नभंतावदीशासं
स्यातीतेवत्सरेराजयाने वित्तपुत्रेचातिविद्यामुपैतिजातःसंपद्योगशालीनरश्चेत् ५९ रिःफाधीशेमंदगेस्वादयस्थेद्वारारंध्रस्वामिनोदुर्बलौच लग्नेया
वद्विंदुसंख्यास्तदीयाजातस्यापुर्वेत्सराःसंभवंति ६० यानाधीशेलग्नगेवाहनस्थेलग्नाधीशेतद्गृहोपेतराशौ त्रिंशत्संख्याबिंदवःसंत्रयश्चेज्जाताराजश्री
विद्यानानंदश्नाः ६१ द्वागावंधुर्नापिभावत्रयेषुत्रिंशन्मानाधिक्यबिंदुप्रयोगेषु जातस्तज्जःश्रीबहुत्वंचराज्यंचत्वारिंशद्वत्सरादूर्ध्वमेति ६२ यत्स्यचविंश
तिमुख्याश्चिरश्मांतमस्यावें[illegible]स्थिताननवमराशिकबिंदवश्च पंचषट्केनसहविंशतिवत्सराणामंतेपरंशारदिवानरवाहनाढ्यः ६३ देवाचार्येवा
हनस्थेस्वतुंगेचत्वारिंशद्विंदुसंख्यासमेतं मेषागोरेलग्नमेवासरेशेजातोराजालक्षसंख्याश्वनाथः ६४ चत्वारिंशद्विंदुयुक्तेविलग्नेचापेमीनभागेवमी
नराशौ स्वोच्चेभौमेकुंभगेभानुपुत्रेजातःसर्वश्रीधरःसार्वभौमः ६५ क्रियादिराशित्रितयोपयाताभवंतिपूर्वादिचतुर्दिशश्च फलादिकेयद्दिशितत्प्रदेशे
धनादिवृद्धिसमुपैतिजातः ६६ लग्नादिशन्यंतगतैस्तुरंगैःसंगुण्यताराहृतलब्धयाते खव्यादिपापेयदिकोणगेवारोगादिपीडाविपुलानराणां ६७ मं राम
दादिलग्नांतफलंचतद्वल्लग्नांतमारादुदयात्कुजांते शुभैक्यसंख्याकृतनारकायांशुभग्रहेसौख्यफलंवदंति ६८ एकाब्धिवर्त्यसहकोबाधकशोधितेस्यात् शा ३८
ध्येराशिचरगुणकैःसंगुणित्वातदैक्यंहृत्वाशैलैरुडुगुणहृतंलब्धमब्दादिकंस्यात् मानाधिक्येविशतमशतेतारकायुग्मे रोगैःसंगुण्यासंदिवसमितिचेप्मोतुलैः

शुद्धमायुः ९ स्वल्पमध्यबहुमानवत्सरा मंडलानपुतकमेकल्पिताः तुल्यकालमुपयांति सर्वतः सद्गुणोदयकरा स्ववीक्षणात् १० श्रीवैद्यनाथकृतं
जातकपारिजातपाराशरादिफलसारसमाप्य याते प्रस्तारभिन्नसमुदायकबिन्दुशीलः संकीर्तितस्तु सकलद्युचरप्रसादात् ११ इतिदशमोध्यायः १०॥ अ
थभावफलानि होरालंकारमुख्यप्रभवशुभफलादीनि सर्वाणि पुंसां तत्तद्भावो द्भवानि द्युचरबलवशाद्यानि तानि प्रवक्ष्ये यंयेभावाः स्थितद्धाम
रगुरुपतिभिः संयुता वीक्षिता वा नान्यैर्दृष्टा न युक्ता यदि शुभफलदा मूर्तिभावादिकेषु १ तन्वादिभावेषु शुभोदयेषु तद्भावनाथोपगतेस्थितेषु तदुक्त
भावस्य समृद्धिरुक्ता न पापखेटैः स्थितसंयुतेषु २ नीचस्थारिपुराशिस्थः खेटो भावविनाशकः मूलस्वतुंगमित्रस्थो भाववृद्धिकरो भवेत् ३ यद्भावना
थो रिपुरिःफरंध्रदुःस्थानपो यद्भवनस्थितस्तु तद्भावनाशं कथयंति तज्ज्ञाः शुभेक्षितश्चेत् फलमन्यथा स्यात् ४ यद्भावपे केंद्रगते विलग्नात्त्रिकोणगे वा
यदि सौम्यदृष्टे तुंगादिवर्गोपगते बलाढ्ये तद्भावपुष्टिं फलमाहुरार्याः ५ तत्तद्भावत्रिकोणसुखमदनगृहे वास्पदे सौम्ययुक्ते पापानां दृष्टिहीने भवन
प सहिते पापखेटैरयुक्ते भावानां पुष्टिमाहुः सकलशुभकरं चान्यथा चेत्प्रणाशं मिश्रं मिश्रप्रदंहे द्वेरविलमपि तथा मूर्तिभावादिकानां ६ नाशस्थान
गतो दिवाकरकरच्छन्नस्तु यद्राशिपो नीचारातिगतोथवा यदि शुभैः खेटैरयुक्तस्थितः तद्भावस्य विनाशनं मुनिगणाः शंसंति खेटैर्युता यद्यत्रापि फल
प्रदानहितदा मूर्त्यादिभानां क्रमात् ७ दुःस्थानेवाधिगमूढदुर्बलभावनायके भावस्य संपदं कर्तुं न शक्ता भावमाश्रिताः ८ दुष्टस्थितो वापि यदा न भोगः
पापारिनीचांशकसंयुतो यः स्वतुंगमित्रांशकराशियुक्तः शुभेक्षितो वा यदि शोभनः स्यात् ९ भावेशाक्रांतराशीशो दुःस्थभावस्य दुर्बलः स्वोच्चमित्रस्व
राशिस्थभावपुष्टिं ददद्बुधः १० यद्भावलाभधनविक्रमराशियाता यद्भावनाथसुहृदुच्चतदुच्चनाथः तद्भावपुष्टिबलमंबरचारिणस्तु कुर्वंति मूढरिपु
नीचविवर्जिताश्चेत् ११ भावाधिपस्तुल्यः खलु वर्तमानो भावाद्व्ययेपूर्णफलं विधत्ते भावान्निकं चाप्यधिके च सत्वेत्रांशिकेनात्र फलं विचार्यं १२ अथ लग्नभा
वफलं शरीरवर्णाकृतिलक्षणानि यशोगुणस्थानसुखासुखानि प्रवासतेजोबलदुर्बलानि फलानि लग्नस्य वदंति संतः १३ नमश्चिरायुर्नृपपूजितः सुखी

जा॰पा॰ लक्ष्म्या ५८ अथ द्वितीयभावफलं वित्तंनेत्रंमुखंविद्यावाक्कुटुंबाशनानिच द्वितीयस्थानजन्यानिक्रमाज्ज्योतिर्विदोविदुः १ वित्तायोदयराशयःपतियु
३६ ताविताधिकोजायतेलाभस्थोधनलाभपानिजसुहृत्तनुंगादिकोचेत्तया तद्वल्लाभधनाधिपोतनुगतावन्यान्यमित्रग्रहोलग्नेशोधनलाभराशिपयुतेलग्ने
बहुद्रव्यवान ५० धनोपयातःप्रथमोथदर्शीग्रहोद्वितीयोधनपस्तृतीयः तत्पाकभुक्तौधनलाभमतिक्रमेणतत्कारकवर्गमूलात ५१ धनस्थयदिलग्नेशनि
धिमानबलसंयुते दुर्बलेपापसंयुक्तेवंचनादिफलंवदेत ५२ धनस्थितःपापदृशासमेतःसपत्ननीचार्ककराभितप्तः तत्पाकभुक्तौधननाशमाहुस्सुगोचरादु
ष्टबलान्वितोवा ५३ कुटुंबभावेबहुखेटयुक्तेधनप्रदस्सोमचरेबलाढ्ये स्वतुंगमित्रस्वगृहोपगेवाधनंसमेत्यामरणांतमाहुः ५४ वित्ताधीशसमोदरेशनयुक्ते
लग्नस्थेचभ्रातृवित्तंसमेति मातृस्थानस्वामिनामातृवित्तंपद्भावेशेनान्वितेनइनेस्यात ५५ वित्ताधीशलग्नगेलग्ननाथवित्तस्थानेपत्नतोवित्तमेव यद्भाव त
स्थोलग्नवित्तेश्वरोचेत्तत्तन्मूलात्द्रव्यवित्तंनराणां ५६ चंद्रःकुटुंबभवनेशुक्रेणनिरीक्षितःप्रदातोच सौम्यशुभसंदृष्टसएवधनवानसदाज्ञेयः ५७ अथो
धीशोयत्रसुस्थानराणांतस्मिन्कालेतत्रवृद्धिविशेषात तद्भावेचद्रव्यलाभंकरोति निवेक्षसौचादिसुसवीर्यसिद्धिः ५८ धनेशलाभसंयुक्तेलाभेशोधनलाभगे॥
तावुभौकेंद्रगौवापिधनवानस्यात्तिमानभवेत ५९ धनेशव्ययषष्ठस्थव्ययेशोवित्तगोथवा लाभेशारिपुरंध्रस्थव्ययेवाधननाशने ६० व्ययभावगतेजीवेवित्ते
शेबलवर्जिते शुभैरनीक्षितेलग्नेवित्तनाशंवदेद्बुधः ६१ लग्नेशोधनराशिस्थोधनेशोलाभराशिगे लाभेशोवाविलग्नस्थेनिध्यादिधनमाप्नुयात ६२ लग्नाय
धनभाग्येशाःपरमोच्चांशसंयुताः वैशेषिकांशगावापितदाकोटीश्वरोभवेत ६३ दिनेश्वरकरक्लिन्नेधनेशोनीचराशिगे पापषष्ठेशसंयुक्तेऋणग्रस्तोभवे
न्नरः ६४ शुक्रेंदुनायकाधीशेरिकस्थेस्तनिशाधकः सूर्यशुक्रौविलग्नेशात्कष्टंसमेध्यलोचनः ६५ विलग्नवित्तास्ततपःसुतशारिपुव्ययच्छिद्रगृहोपयाताः लि राम ३६
लग्नसंबंधकाः सितश्चेद्विलोचनाभावमुपैतिजातः ६६ सितःसुतारीशयुतोविलग्नेनरशाक्षोपान्वयनप्रमादः धनेशभौमौयदिलग्नयातोताकर्णस्थरोगंकथयंति
तज्ज्ञाः ६७ शन्यारयोगेगुलिकेनयुक्तेनेत्रेश्वरेतत्रनुरोगनेत्रः नेत्रेयदापापबहुत्वयोगेयमनदृष्टसतिशेषनेत्रः ६८ नेत्रेश्वरेशुभयुतेशुभदृष्टियुतेथवा शुभांशक

स्थितेवापिशुभदृक्सनरोभवेत् ६९ जातोसौमुमुखःशुभेधनगतेतुंगादिवर्गान्वितेतद्भावेयदिसौम्यवर्गसहितेवाक्सिद्धिमेतिध्रुवं आज्यस्यशंमुपतिवित्त
गृहगभौमेदिनेशक्षितेजातःकोद्रवमुख्यभुक्धनगतेराहौचपापेक्षिते ७० लग्नास्तायांशुमस्थेकेभौमेवान्यतरक्षिते आज्यस्यशोणितेभीतिर्वासंभवेतिमसूरि
काः ७१ पापेयुतेमुखस्थानेदुर्मुखःपापवीक्षिते क्रोधानन्मेनरःपापातदीर्घगुलिकान्विते ७२ प्रफुल्लवदनःश्रीमान्केंद्रेमुखपतौयदा स्वोच्चस्वमित्रवर्गस्थ
सुमुखःशुभवीक्षिते ७३ वाग्भावेशोराहुयुक्तेचदुःस्थगाहुक्रांतस्थाननाथान्वितेच पाकेभुक्तौतस्यदंतामयःस्यात्जिह्वारोगंनारकासृनभुक्तौ ७४ राहुद्वि
तीयगृहपौसहजेशयुक्तौजातःसंमतिगलरोगमतीवकष्टं दारिद्र्यदोरविशशीधनराशियातौभौमार्कजौसकलरोगकरौभवेतां ७५ वाग्भावेशगुरूयुतेनाशस्थ
मूकताभवेत् दोषकृत्वेनसर्वत्रस्वोच्चस्वर्क्षगतोग्रहः ७६ वागीशबुधजीवेषुनिर्विद्यानाशगेषुच केंद्रेयुतेत्रिकोणेवास्वर्क्षेवाविद्ययान्वितः ७७ द्वितीयेदुर्बल
सौम्येदृष्टेपुद्भहतोभवेत् जीनार्थेशोदुर्बलौवापवनव्याधिमान्नरः ७८ वाक्स्थानपेदेवपरोहितेनयुक्तेयदानाशगतेतुमूकः वाक्स्थानपेसौम्ययुतेत्रिकोणे
केंद्रस्थितेवाशुभदृक्चवाग्मी ७९ वागीशस्यांशकेसौम्यस्वोच्चेवाशुभवीक्षिते पारावतांशकेनापिवाग्मीपटुनरोभवेत् ८० केंद्रत्रिकोणगेजीवशुक्रस्वोच्च
गतेयदि वाग्भावपेदुपुत्रेवागणितज्ञोभवेन्नरः ८१ गणितज्ञोभवेज्जातोवाग्भावभूमिनंदने ससौम्यबुधसंदृष्टकेंद्रेवासोमनंदने ८२ वाग्भावपेरवौभौमगुरु
शुक्रनिरीक्षिते पारावतांशकेवापितर्कपंक्तिपरायणः ८३ संपूर्णबलसंयुक्तगुरोनङ्ववनेश्वरे दिनेशभृगुसंदृष्टशाब्दिकोयंभवेन्नरः ८४ वेदांतपरिशीलःस्या
त्केंद्रकोणगुरौयदि बुधेनभृगुणादृष्टोशनौपारावतांशके ८५ नरःशास्त्रवल्लमःकेंद्रेजीवेदानवपूजिते सिंहासनेगोपुरांशेवाग्भावस्थांशपेबुधे ८६ उपजी
व्यनरःसर्वेनदीक्षागोपुरांशके चंद्रेतमुदितास्तस्यभृगौपारावतांशके ८७ नास्तिचद्राजयोगंतुपरस्कृत्यनरंजनाः जायाकुटुंबगृहवासितपापयुक्तादुःस्थाचनत्स
मकलत्रहरोभवेतां वित्ताधिपेबलवतिस्मरराशिपवा तुंगादिगेयदिसमेतिकलत्रमेकं ८९ भुक्तिस्थानपतौसितेंदुसहितेलग्नादिकेंद्रस्थितेराप्यपात्रमुपैति
कांचनमयंजीवेंदुशुक्रान्विते भुक्तिस्थानपदेहपौशनियुतौलोहादिपात्रेवदेद्भौमपापनिरीक्षितेधनगतेजातःकदन्नादिभुक् ९० चन्द्राशेनाभुक्तिपतौसपापेदावा

पा·पा· मिदं दुर्युधकालभागे नीचांशकेपापनिरीक्षितेनशुभेनेदोषः सहितेक्षितेवा ११ भुक्तिस्थानेशुभयुतेतदीशेशुभसंयुते शुभग्रहेणसंदृष्टे सुखभुक्सनरो
३१ भवेत १२ परान्नभुक्तदीशेपि नीचशत्रुसमन्विते नीचखेचरसंदृष्टेतद्दूषणपरायणः १३ कालोविनाशनिभुक्तिनाथलग्नेशवीक्षिते पापग्रहेणसंदृष्टे
नीचांशादियुतेनन १४ स्वल्पाशीरुक्षिकामःस्याद्भुक्तिनाथेशुभेगृहे स्वोच्चेशुभसमंदृष्टेमृद्वंशादिसमन्विते १५ भुक्तिस्थानाधिपेमंदेतदीशेवार्किसंयुते
॥ नीचर्केसृजनादृष्टेश्राद्धभुक्सततंनरः १६ सिंहासनांशेयदिदेवपूज्येशुक्रेयदागोपुरभागयुक्ते पारावतांशेधनपेबलाढ्येजातस्त्वसंख्याश्रितरक्षकःस्या ऐ
त १७ ॥ इतिपारिजातेएकादशोऽध्यायः ११ ॥ अथतृतीयभावफलं ॥ ज्येष्ठानुजस्थितिपराक्रमसाहसानिकंठस्वरश्रुतिवराभरणांशुकानि धैर्यंचवीर्यबल
मूलफलाशनानिवक्ष्येतृतीयभवनात्क्रमशोक्तिजानि १ भ्रातृस्थानेतृतीयेचनवैकादशसप्तमे तत्तदीशदशायांचभ्रातृलाभोभवेन्नृणां २ भ्रातृस्थानेश
तन्नाशीतद्भावस्थ्यवचारिणां मध्येबलसमेतस्यदशासोदरवृद्धिदा ३ भौमेबलविहीनश्चेद्दीर्घायुभ्रातरोभवेत् विलग्नतोबलीयस्यकारकःसप्रभुःस्मृतः ४
जन्मकालेगुणीप्राणिकारकोयःसमृद्धिकृत् क्षयकारीविपर्यासेभावतोविबलाधिकः ५ सोदरेशुक्रजीनांशगतेतोचतत्सोदरक्षयः पापदृग्योगसपापोवाभ्रा
तृनुत्पाद्यनाशदो ६ नीचास्तगोसोदरनायकास्मै नीचांशगोनीचसमागतोवा क्रूरस्यषष्ठांशगतोतदानींभ्रातॄन्समुत्पाद्यविनाशहेतुः ७ अतिक्रूरस सो
मायुक्तेभावेवाकारकेपिवा तद्भावनायकेवापिस्वाल्पेसोदरनाशनं ८ धनेश्वरेनाशगतेबलाढ्येपापान्वितेसोदरकारकास्ये तस्मात्कारस्थ्रहसंयुतेच
मापतन्मातुःसहजावदंति ९ भ्रातृस्थानेयदिशुभयुतेसोदराणांचिरायुः पापाक्रांतेसहजभवनेपापदृष्टेविनाशं ज्येष्ठंहंतिद्युमणिरनुजस्थानगःपाप राम
दृष्टःसौरस्तस्यानुजमवनिजोहंतिसर्वानकनिष्ठान् १० त्रिकोणकेंद्रेयदिपापखेटेतृतीयभावादनुजस्यनाशं शुभोपयातेसहजाभिवृद्धिःशुभाशुभे ३१
मिश्रफलंवदंति ११ दुःस्थेचंद्रेसोदरस्वामियुक्तेजातस्यान्यस्तस्यपानंवदंति मातृभ्रातृस्थानेपापावधुयातोनास्तिभ्रातृस्थानवृद्धिर्नराणां १२ भौमान्वितो
सोदरदौभवेत्तौ अन्यैःसमेतोयदिनानुजःस्यात् सौरस्तृतीयेनजनाशकर्तानिधुंतुदःसोदरवृद्धिकृत्स्यात् १३ अदृश्यराशौयदिवासपापःखधृग्गृहस्यसह

जाधिनाथे जातानुजस्योपरि नानुजः स्यात्पुंवर्गेगे दृष्टगते तथैव १४ भ्रातृस्थानपतौ तुंगभवनं गतस्यानुजो जायते युग्मर्क्षे यदि भार्गवेण शशिना युक्तेथवा
वीक्षिते सौम्यर्क्षे शुभखेचरेक्षितयुते केन्द्रत्रिकोणस्थिते पश्चाज्जातसहोदरस्थिरसुखी दीर्घायुरारोग्यभाक् १५ सहोदरस्थानपतौ नतस्थे सलग्नके सोदरना
यके वा नतोभयं गर्भमतेन तत्संस्यात् तृतीयराशौ सवितीनथैव १६ लाभावसानभवनोपगतग्रहेंद्रैः संख्यास्तदग्रजजनाः सहजा भवंति लग्नात्तृतीयधनप्रातवि
पर्ययेंद्रैः संख्याजनास्युरनुजाः कथयंति तज्ज्ञाः १७ भ्रातृस्थानपकारके दिनयुताशीर्यौधिकायद्यदा तद्युक्तग्रहसंख्ययानुजजनं जातः समेति ध्रुवं चन्द्रापि
नीचमूढरिपुगा निघ्नंति जातानुजांस्ते कुर्वंति चिरायुरिष्टबलिनः सर्वानुजानां ग्रहाः १८ भ्रातृस्थानप भस्य खेटचतुष्टये द्वौ वीर्यवंतौ यदा नाश्यनाशफलमदौ सम
याधीर्यौधिकाश्चेद्ध्रुवः खेटाः स्वल्पसहोदरप्रदायकराः दुःस्थानगास्तौ ग्रहा यद्यल्पानुजवृद्धिदास्तदनुजस्वाम्यंशसंख्यानुजाः १९ भूमिजसहजस्थाने यावतांविद्य
ते फलं शत्रुनीचग्रहे त्यक्ता तावंतः सहजाः स्मृताः २० भ्रातृदोस्त्री ग्रहदर्शस्यो भ्रातृदोषं ग्रहर्क्षगौ सोदरेशकुजौ स्यातां भ्रातृभ्रात्रौ सुखमंदौ २१ स्त्रीहोरया वापु
वति ग्रहेक्षणयुक्ते यदि भ्रातृगृहे विलग्नात् सहोदरीलाभमुपैति जातः सहोदरं तत्परतोन्यथा वेत् २२ कारकः सहजाधीशस्तद्दर्शी तत्रसंस्थितः दृग्यनिष्टकरास्तेषां
स्वदशांतर्दशासु च २३ कारकादिचतुःखेटस्फुटयोगांशकानुजाः वर्ग्योनीचाभिमूढांशाः स्वोच्चादिगुणीकृताः २४ तृतीयात्सप्तमर्क्षेण भ्रातृभार्याफलं वदेत्॥
गतेमंदेसासुरेज्यानिशाकरात् ५८ आज्ञास्थानाधिपेसौम्यशुभयुक्तेक्षितेपिवा शोभनांशगतेवापिजातस्त्वाज्ञाधरोभवेत् ५९ आज्ञाधिपेमंदयुतेरंध्रना
थेनवीक्षिते क्रूरांशकेंद्रराशौवाक्रूरात्मकरोतिमः ६० कर्कटस्थनिशानाथगुरुशुक्रनिरीक्षिते पारावतादिभावस्थसत्कीर्तिधनवान्भवेत् ६१ माने
शेशुभसंयुक्तेशुभमध्यगतेपिवा शुभग्रहांशकेवापिकीर्तिमानभिमानवान् ६२ पापेक्षितेकर्मणिपापयुक्तेमानाधिपेहीनबलोपयाते जातोपवादीविग
ताभिमानःस्वकर्मतेजोबलकीर्तिहीनः ६३ कर्मेशानन्नवांशेशोशनिसंबंधसंयुतौ षष्ठाधिपयुतोद्दष्टोबहुदागान्वितोभवेत् ६४ भूसुतक्षितिराशिपाचब
लिनौकेंद्रत्रिकोणायगौकर्मेशेभृगुचंद्रयोदितयुतेकृष्यादिगोवित्तवान् संबंधीयदिकर्मणःशशिसुतोवाणिज्यशीलःसदासौम्यासौम्ययुतेतुसात्विकतमा

जा॰पा॰ निद्रौ विमिश्रैन्यथा ६५ अथ लाभभावफलं लाभस्थानेन लग्नादखिलधनचयप्राप्तिमिच्छंति सर्वे लाभस्थानोपयातः सकलबलयुतः खेचरो वित्तदः
४९ स्यात् भानुश्चेज्ज्ञातिवर्गादति धनमुडुपो मातृवर्गेण भौमः स्वोत्थाच्चाद्रिर्यदि स्यात् प्रभुविबुधसुहृन्मातुलैर्वित्तमेति ६६ जीवो यच्छति वेदशास्त्रयजनाचारा
दिपत्रैर्द्धनं शुक्रः स्त्रीजनकाव्यनाटककलासंगीतविद्यादिभिः दासीदासकृषिक्रियार्जितधनं धान्यं समृद्धं शनिर्विप्रादिद्युचरेण वीक्षितयुते विमादयो
वित्तदाः ६७ आयस्थः शुभखेचरः शुभधनं पापस्तु पापार्जितं मिश्रैर्मिश्रधनं स्वमेति मनुजस्तज्ज्ञातकोक्तं वदेत् लाभस्थानगतः समस्तगुणवान् दृष्टाधिक
श्चेद्बली जातो यानविभूषणांबरवधूभोगादिविद्याधिकः ६८ वित्तश्चाप्यगृहाधिपो तनुपते रिष्टग्रहो चेद्धनं सत्कर्मोरविम पुण्यविषयदानादियाम्यं वदे
त् आयस्थो विबलः पराजितबलो नीचारिदुःस्थानपोऽरकागोगकरोयदि स तदिनं कुर्वीत भिक्षाटनं ६९ लाभेशादिनपश्च वा शशधरो भूपालतुल्याश्रया
द्भौमः मंत्रिजनाग्रजानुजकृपिद्वारा धनं लभ्यते विद्याबंधुसुतैः सुधाकरसुतो जीवो निजाचारतः शुक्रो रत्नवधूगजादिपशुभिर्मंदः कुवृत्त्याश्रयं ७० लाभ
स्थानपतो विलग्नभवनात् केन्द्रत्रिकोणस्थिते लाभे पापसमन्विते तु धनवान् तुंगादिराशिंगते तत्तत्कारकवर्गतो बलवशाद्योगानुसारं वदेत्तनत स्वदद
शापहारसमये वित्तं वदेत्तद्विदः ७१ अथ व्ययभावफलं लग्नाद्व्ययनदीशभानुतनये दूराटनं दुर्गतिं दातृत्वं शयनादिसौख्यविभवं वित्तक्षयं चिंतयेत् रिः
फस्थे चरखेचरे चरगृहे दुःस्थाननाथेऽथवा नानादेशवनाटनो हि शनिना युक्तेऽथवालोकिते ७२ रिःफस्थानगते शुभे शुभयुते सौम्यग्रहालोकिते तन्नाथे विब
लेरिनीचगृहगे वित्तव्ययाभावभाक् रिःफस्थे विबलेबलेन सहितो रिःफाधिपे वित्तहा मिश्रव्योमचरान्विते तु सकलं मिश्रव्ययं देहिनो ७३ दुष्टव्ययं भवति शो
भनवर्गयाते दुष्टव्ययं क्विबलखेचरयुतेक्षितेवा यत्कारकद्युचरवर्गजनाद्दनर्थो जातः स्मर्यतिबलहीनदशापहारे ७४ क्रूरग्रहे बलवति व्ययगे विनाशस्थानाधि राम
पे कृषिधनस्थितिनाशकः स्यात् रिःफे चतुर्द्विपदभेसहितेऽन्यदेनखेचरेन सर्वपशुभृत्यविनाशमेति ७५ विप्रादिखेचरयुते सति विप्रमुख्यैः स्त्रीवर्गतः सुतरुणी ४९
खचरेण युक्ते रिःफे नरग्रहयुते रिपुणा सुहृद्धेर्जातः सुहृज्जनवशाद्धननाशमेति ७६ त्यागी शुभग्रहयुते कृपिकः स्वधर्मी पापे वसानगृहे गतविषादशीलः नेत्रा

मयः पवनकृच्च पलोटनः स्यादुच्चस्वमित्रभवनेतु परोपकारी ७७ भानुर्वा कृशशीतगुर्व्ययगतो वित्तस्य नाशं नृपैर्भौमेनाशयतीं दुजेक्षितयुतो नानाप्रकारैर्द्र
नं वागीशेंदुसुतायदिव्ययगतौ वित्तस्य संरक्षकाः सौम्याः शुक्रयुतेक्षितो यदि नृणां शय्यासुखं जायते ७८ व्ययेशे स्वोच्चराशिस्थे शुभवर्गसमन्विते शुभ
खेचरसंदृष्टे पर्यंकशयनं वदेत् ७९ विचित्रमंचशयनं व्ययेशे परमोच्चगे भाग्यनाथेन वा दृष्टे मणिरत्नविभूषिते ८० शुक्रे वा रविनंदने हिमकरे रंध्रत्रिको
णस्थिते तन्नेहे शिथिलीभवन्नृपतनं जातस्य केतूवन्विते निद्राग्नोकृकलासगोलिपतनं पापान्विते भार्गवे भौमेकच्छपदर्शनं त्वथ युते जातश्च हिंस्राभयेन ८१ मं
दाहिध्वजसंयुते तु निधनस्थानाधिपेनान्विते रिःफे दुर्गतिमेति षष्ठपतिना दृष्टे यथा मानवः जातो याति परंपदं सुरगुरौ लग्ने भृगौ कामगे कन्यास्थे रजनीकरे
यदि धनुर्लग्ने च मेषांशके ८२ दुस्थे दृष्टगृहाधिपे बलयुते तद्भावपुष्टिं वदेद्दायुस्थानपतौ तु यत्र विबले तद्भावनाशं तथा लग्ने ... भं स्वर्वीक्षितयुते तद्भावपातो ब
लीतद्भावस्य शुभंकरोति विपुलं नो चारिगस्त्वन्यथा ८३ इति श्रीनवग्रहकृपया वैद्यनाथविरचिते जातक — पारिजाते पंचदशोऽध्यायः १५ ॥ अथ स्त्री
जातकफलं श्रीवल्लारार्यसंतानविद्याकीर्तिविवर्द्धनं त्रिंशद्भग्रहसंयुक्तं जातकं ब्रूमहे वयं १ अथो जनेसहायः पुरुषाणामापदर्णवपोतः यत्राका
लेमंत्री ज्ञातकमपहाय नान्यपरः २ श्रीमज्जातकपत्रिकापरहितव्यामाधिवासस्फुटैः पंचांगद्युचराष्टवर्गसहितस्थानादिषड्वीर्यजैः ...युर्गोच
रयोगभावजफलैः साद्दशाचक्रजैर्दीर्घायुः सुतभर्तृसौख्यविपुलश्रीकीर्तिदा लिख्यते ३ स्त्रीणां जन्मफलं नृयोगमुदितं यत्तत्पतौ योजयेत्ता मां रे दृग्
भाशुभं हिमकरालग्नां च्चवं ... धिकात् भर्तृणामगुणंगुणं मदगृहात्छिद्रात्वत्तेषां मृतिः सौम्यासौम्यबलाबलेन सकलं संचिंत्य सर्वं वदेत् ४ स्त्रीणां
जन्मनि लग्नशीतकरयोर्मध्ये बलीयस्ततः संपद्रूपबलानि तत्र वमतः पुत्रायवृद्धिं वदेत् सौमंगल्यमनिष्टमष्टमगृहाद्भर्तुश्रियं सप्तमात्कनिद्र्ते
शुभाशुभं शुभगृहादिच्छंति होराविदः ५ वैधव्यं निधनेन लग्नभवनात्तज्जा यशः संपदः पुत्रं पंचमभावतः पतिसुखं कामेन केचिद्विदुः प्रव्रज्यामपिवा
पितामतिसुखं धर्मोपयात ... शं नीवजयोगजन्यमखिलं नारीनराणां समं ६ युग्मे लग्ननिशाकरौ यदि वर ... रूप ... न्मिलं ... लंकिता संप

जा·पा· ...ग्गुणवती साध्वी च संप्रयुता ओजर्क्षे पुरुषाकृतिश्च चपला पुंचेष्टिता पापिनी पापख्याम चरेणवीक्षितयुतौ जाता दुराचारिणी ७ लग्नेंदू विषमर्क्षगौ शु
५० भृगुतौ सौम्यग्रहालोकितौ नारी मिश्रगुणाकृतिस्थितिगतिप्रज्ञावती जायते युग्मागारगतौ तु पापसहितौ पापेक्षितौ वा तथा तद्राशीशयुतेक्षकग्रह
बलाद्वादाहुः समस्तं विदुः ८ ओजविलग्ने पुरुषे बलिष्ठे बलान्वितेश्च द्युधासुरेज्यः सामान्यशक्तौ सति सूर्यपुत्रे जाता हि तस्या बहवो धवाः स्युः ९ युग्म
विलग्ने कुजसौम्यजीवशुक्रे बलिष्ठैः खलु जातकन्या विख्यातनाम्नी सकलार्थतत्त्वबुद्धिप्रसिद्धा भवतीह साध्वी १० सौरे मध्यबले बलेन रहितैः
शीतांशुशुक्रेंदुजैः शेषैर्वीर्यसमन्वितैः पुरुषिणी यद्योजराश्युद्गमे जीवारास्फुजिदिंदवेषु बलिषु प्राग्लग्नराशौ समे विख्याताखिलशास्त्रयुक्तिकु
शला स्त्री ब्रह्मवादिन्यपि ११ त्रिंशांशफलम् लग्ने भौमगृहं गते शशिनि वा वीर्याधिके भूसुतत्रिंशांशप्रभवाऽबला यदि दुराचारप्रयुक्ता भवेत् प्रेष्याभा
नुसुतांशके गुणवती साध्वी च जीवांशके सौम्यांशमलिनी सितांशजवधूर्जारवृताचारिणी १२ लग्ने भार्गवराशिगे कलहकृद्दुष्टा कुजस्यांशके साध्वी
पुत्रवती पुरंदरगुरोरंशे पुनर्भूशनेः सौम्यस्यांशसमुद्भवाखिलकलासंगीतवाद्यप्रिया शुक्रांशे बुधवल्लभा च सुभगा लोकप्रिया जायते १३ त्रिंशांशे वनि
जस्य बोधनगृहे लग्नेत्वपत्रान्विता मंदांशे विधवाथवा मृतसुतक्लीवाकृतिस्यासती ॥ जैवे भर्तृपरा बुधस्य तरुणी विख्याततेजस्विनी शौक्रे चारुतरांबरा
भरणागौ वित्तप्रसिद्धा भवेत् १४ लग्ने चंद्रगृहं गते बलवति क्षोणीसुतस्यांशके जाता जारविनोदशीलरसिका पापेक्षिते शीतगौ विप्रघ्नस्तार विजस्य निजे
सौराराल्पायुरल्पात्मजा बाधे शिल्पकलावती भृगुसुतत्रिंशांशके कामुका १५ भानुक्षेत्रगते तनौ शशिनि वा भूनंदनस्यांशके नारी पुंप्रकृतिस्थिता च कु राम
...मंदांशके दुःखिता जीवांशे नृपवल्लभा गुणवती सौम्यस्य पुंचेष्टिता दुष्टा चासुरवंदितस्य कुपतिस्नेहान्विता रोगिणी १६ वागीशस्य गृहोदये वसुमती पुत्रस्य ५०
...गोद्भवा विख्याता परिचारिणी रविसुतस्यांशे दरिद्रा भवेत् जीवांशे धनवस्त्रभूषणवती सौम्यस्य संपूजिता साध्वी दानवमंत्रिणः सुतवती सद्वस्त्रभूषान्विता
...लग्ने मंदगृहे बलिन्यवनिजत्रिंशांशके शोकिनी मंदांशे सतिदुर्भगा निजकुलाचारानुरक्ता गुरोः सर्वेज्ञाकुलटा बुधांशजनिता शुक्रस्य वंध्या सती लग्नेंदु सु

र्योगतस्तु सकलत्रिंशांशं जवावदेत् १८ आग्नेयं विधवास्तराशिसहिते मिश्रैः पुनर्भूर्भवेत् क्रूरे हीनबले स्तगे स्वपतिना सौम्येक्षिते प्रोज्झिता अन्योन्यांश
कयोः सितावनिजयोरन्यप्रसक्तांगना द्यूने वाय दिशीतरश्मिसहिते भर्तुस्तदानुज्ञया १९ स्वैरिणी पापतिं त्यक्त्वा सवर्णकामतः श्रयेत् अस्तेनचप्रजाद्वारं पुनर्भूः सं
स्कृता पुनः २० सौम्यारर्क्षे लग्नगे संदु शुक्रे मात्रा सार्द्धं पुंश्चली पापदृष्टे कोजे स्वंशे सौरिणा व्याधियोनिश्चारुश्रोणी वल्लभा सद्गृहांशे २१ बलहीने स्तगे पापसौम्य
ग्रहनिरीक्षिते पत्या विसृज्यते नारी नीचारिस्थे च वैरिणी २२ उत्सृष्टा मदनस्थिते दिनकरे शत्रुग्रहालोकिते विश्वस्ता वनिजवधूरमणयोरन्यान्यवैरं तु वा सौ
म्या सौम्ययुते कलत्रभवने ज्याता पुनर्भूः शनौ कामस्थे रिपुवीक्षिते त्वविधवा जाता जरां गच्छति २३ पापर्क्षे मदनस्थिते शनियुते वैधव्यमत्यंगना जारासक्त वि
लाभिनी सितकुजावन्योन्यराश्यंशकौ चंद्रे कामगृहं गते तु पतिना सार्द्धं दुराचारिणी मंदारर्क्षे विलग्नगे शशिसितौ वंध्या सुतस्थे खले २४ कलत्रराश्यंशग
ते मन्त्रीजे मंदेक्षिते दुर्भगमेति कन्या शुक्रांशके सौम्यदृशा समेते कलत्रराशीपतिवल्लभा स्यात् २५ भौमागारे विलग्नगौ शशिसितौ नारी पतिद्वेषिणी चंद्रज्ञौ
परतत्ववादचतुरा भौमेंदुजौ भोगिनी चंद्रज्ञौ सुरवंदिता यदि सुखद्रव्यान्विता लग्नगा वागीशो यदि लग्नगः सुतनया प्रज्ञाविभूषान्विता २६ तुंगस्था गगनाट
नाः शुभकरा रंध्रे सपापे वधूर्वैधव्यं समुपैति पापभवने पापग्रहालोकिते रंध्रेशांशपतौ खले च विधवा निःसंशया भामिनी सौम्ये रंध्रगते ः समेति तरुणी प्रागेव
मृत्युं पतेः २७ भाग्यस्थाः शुभखेचराः स्मरगते पापे ष्टमस्थेथवा भर्तुः श्रीबहुपुत्रसौख्यविभवैः सार्द्धं चिरं जीवति क्रूरे बंधुगृहे पंगवेंदुसुतप्रासा भवत्यंगना चा
पेवा कण्टकोदये पतिसुतप्रासादरिद्रान्विता २८ गोसिंहालिवधूदये सुतगते चंद्रेल्पपुत्रान्विता पापैरष्टमभोदयाष्टमगते दौरिक्ष्यशोकाकुला सौम्या सौम्ययुते
श्वामिश्रफलिनी सौम्यैः शुभश्रीयुता पुत्रेशारिगते तनौ रिपुगतौ शस्त्रेण मृत्युर्भवेत् २९ क्रूरे व्येहे रस्तगतैः समस्तैर्विलग्नराशौ विधवा भवेत्सा मिश्रैः पुनर्भूरिह जा
तकन्या पत्युर्हि ज्झिता हीनबलैरसद्भिः ३० स्त्रीजन्मलग्नात्स्मरगशशांकशुक्रारयुक्ते यदि जातकन्या सापत्यनुज्ञा परगामिनी स्यात्सौरारभांशोपगते तथैव ३१
सौरारभांशोपगतग्रहेषु शुक्रेंदुयुक्तेषु शुभप्रदृश जाता कुलाचारगुणैर्विहीना मात्रा च सार्द्धं व्यभिचारिणी स्यात् ३२ क्षितितनयनवांशे लग्नतः सप्तमस्थे दिन

करबुधदृष्टेव्याधियोनिः प्रजाता शुभकरनवभागे सप्तमस्थानसंस्थे सुभगसुतवती सा चान्यथा दुर्भगा स्यात् ३३ कामासक्तमनस्विनी च विधवा पापद्वये
सप्तमे पश्चात्त्वामिवधं करोति कुलटा पापत्रये चास्तगे राजामात्यवरांगनाथ यदि शुभे कामं गते कन्यका मारस्थे तु शुभत्रये गुणवती राज्ञी भवेद्भूपतेः ३४ अ
न्यान्यांशगतौ सितार्कतनयावन्योन्यदृष्टौ तु वा कुंभे वाष्टमभागजातवनिता कामाग्निततप्ता भवेत् वैधव्यं समुपैति चंद्रभवनात् क्रूरे मदस्थानगे चंद्राद्दस्त
गृहाधिपगः शुभकरो राज्यास्पदं यच्छति ३५ स्त्रीजन्मलग्ने शशिशुक्रयुक्ते कोपान्विता सा सुखभागिनी स्यात् सर्वत्र चंद्रे सति तत्र जाता सुखान्विता
वीतरतिप्रिया स्यात् ३६ शुक्रेंदुभे रूपगुणाभिरामा कलावती जीवबुधोदये तु लग्नस्थिता जीवबुधा सुरज्या जातांगना सर्वगुणप्रसिद्धा ३७ वाचस्प
तौ नवमपंचमकेंद्रसंस्थे तु गारिके भवति शीलसमन्विता च साध्वी सुपुत्रजननी सुखिनी गुणाढ्या नूनं कुलद्वययशस्करिणी भवेत्सा ३८ यदि
शुभकरदृष्टा शिल्पिनी शुद्धचित्ता सततमिह सलज्जा चारुमूर्तिः सुपुत्रा बहुधनशुभयुक्ता वल्लभं वल्लभत्वं व्रजति शुभशतानां भाजनत्वं च होरा ३९
चंद्रे कर्कटकोदये च बलिभिः शुक्रज्ञजीवेंदुभिर्नाना शास्त्रकलारसज्ञचतुरा ख्याता तेजस्विनी कामस्थैरथवा विलग्नभवनाद्धर्मस्थितैः खेचरैः प्रव्र
ज्यामुपयाति जन्मसमये पाणिग्रहे चिंतयेत् ४० पापैस्तु नवमगतग्रहस्य तुल्यां प्रव्रज्यां युवतिरुपैत्यसंशयेन उद्वाहे वरणविधौ प्रदानकाले चिंता
यामपि सकलं विधेयमेतत् ४१ जन्मन्युद्वाहकाले च चिंतायां वरणे तथा स्त्रीणां चिंता बुधेनोक्तं घटते तत्स्वतिष्वपि ४२ क्रूरेष्टमे विधवता निधनेश्व
रांशे यस्य स्थितेवयसि तस्य समे प्रदिष्टा सत्स्वर्थगेषु मरणं स्वयमेव तस्याः कन्यालिगोहरिषु चाल्पसुतत्वमिंदो ४३ रंध्रे मिश्रबले शुभाशुभखगे
र्लोकितेवा युतेदंपत्योः समकालमृत्युमखिलज्योतिर्विदः संविदुः एकस्यां मदलग्नयोश्च यदि वा लग्नस्थिते कामपे कामस्थे तनुपे शुभग्रहयुते मृ
त्युस्तयोस्तुल्यतः ४४ सत्स्वर्थगेषु स्वयमेव सा स्त्री विपद्यते तत्परिपाककाले रंध्रस्थितन्नाथतदंशपानां दशापहारे मृतिमाहुरार्याः ४५ सहजभवन
नाथे पुंस्थे पुंग्रहर्क्षे पुरुषखचरयुक्ते पुंग्रहालोकिते वा नयनभवनकेंद्रकोणगे वा बलिष्ठे बहुधनसुखवंतं सोदरं याति जाता ४६ सहोदरस्थानपत्ना

भनाथेऽथ विलग्नतः पंचमंराशियातो नृपालतेजोगुणरूपवंतंसहोदरं जानवधूसमेति ४७ अथपतिलक्षणं यस्यामन्मथमंदिरे गतबलेभून्येखला
लोकितेसौम्यव्योमनिवासदृष्टिरहितेभर्तानरःकोभवेत् क्लीबःस्यात्पतिरस्तगेशशिसुतेसाकोत्मजेदुर्भगावंध्यावातरुणीचरेमदगृहेनित्यप्रवासा
न्वितः ४८ स्वांशेभास्वतिकामगेमदरतिक्रीडाविनोदीपतिश्चंद्रेसौख्ययुतेपतिभूमितनयेजारोवधूतत्परः विद्वानचंद्रसुतेजितेंद्रियवरोजीवेमदस्था
नगेप्युत्रैकांतवपुःसुखीचरविजेवृद्धोतिमूर्खोभवेत् ४९ स्यान्मार्दवांगोगुणवान्प्रगल्भोजामित्रराश्यंशकजातमर्त्यः सौरेस्तगेस्वांशगृहेपयातेव
द्धोतिमूर्खःपतिरेवतस्याः ५० दस्याधर्मगृहेशदेवसचिवौभर्तागतायुर्भवेद्दीर्घायुर्धनवान्त्रिकोणगगृहगोकेंद्रस्थितोवायदि विद्वानबोधनवाहने
शसहितोसौराहवीजोकर्षकःस्वभानुध्वजमंयुतोयदिखलःसारीश्वरश्चोरराट् ५१ गौरांगःपतिरस्तगेदिनकरेकामीसरोषक्षणश्चंद्रेरूपगुणान्वितःकृ
शतनुर्भोगीरुगार्तोभवेत् नम्रःक्रूररसालसःपटुवचःसंरक्तकांतिःकुजेविद्याविनगुणप्रपंचरसिकःसौम्येमदस्थानगे ५२ दीर्घायुर्नृपतुल्यविनविभ
वःकामीचबाल्येगुरौकांतोनित्यविनोदकेलिचतुरःकाव्येकविःक्ष्मापतिः मंदेवृद्धकलेवरास्थिरतनुःपापीपतिःकामगेराहोवाशिखिनिस्थितेनमलिन
धीनीचोथवातत्समः ५३ द्विरदेशस्थितिवर्मकर्मजगुणाःपुंजातिकेयोषितांयेनारीजनजातकेनिजपतौसंयोजितास्तत्वतः द्यूनांशापगतग्रहेषुबल
वत्खेचरांशतुल्याःसुताःकेंद्रेकामपतिःकरोतिविपुलंकल्याणकालोत्सवम् ५४॥इतिश्रीनवग्रहकृपयावैद्यनाथविरचितेजातकपारिजातेषोडशो
ऽध्यायः १६॥ अथकालचक्रम् प्रणम्यपरमात्मानंशिवंपरमकारणं खेचरंचक्रमध्यस्थंचतुःषष्टिकलात्मकं १ तंदृष्ट्वादेवदेवेशमीश्वरंसर्वमंगला का
लचक्रगतिंसर्वांविस्तराद्वदमेप्रभो २ ईश्वरउवाच अहमादित्यरूपोस्मिचंद्रमास्त्वप्रचक्ष्यसे संयोगेनवियोगेनजगत्स्थावरजंगमं ३ पंचमाचीरालि
खिद्वाणसंस्मातिर्यग्गेवावर्जितांतश्चतुष्काः प्रागादौसद्वादशव्योमवासाज्योतिश्चक्रस्वामिनस्तुवराद्याः ४ धराजशुक्रज्ञशशीनसौम्यसितारजीवार्क
जमंदजीवाः क्रमेणमेषादिकराशिनाथास्तदंशपाश्चेतिवदंतिसंतः ५ भूतैकविंशद्गिरयोनवदिक्कुपोडशाब्धयः सूर्यादीनांक्रमादब्दाराशीनांस्वा

ज्ञा·पा· मिनोवशात् ६ अश्वीपुनर्वसूहस्तमूलप्रोष्ठपदादिषु अंशकानगणयेन्मेषात्प्रादक्षिण्यक्रमं वदेत् ७ रोहिणीमघवैशाखवैष्णवादिषु भेषु च अंश
५२ कान्वृश्चिकादीनां गणयेदपसव्यतः ८ दक्षिणात्रिकनक्षत्रद्वादशांशकराशिषु चक्रमप्रदक्षिणीकृत्य मीनांतं विन्यसेत्पुनः ९ उत्तरात्रयनक्षत्रे वृश्चिका
द्यप्रदक्षिणं कृत्वा चापांतकेन्यस्मिन्ज्ञातव्ये दक्षिणोत्तरे १० सव्यापसव्यमार्गेण चाश्विन्यादित्रिकं त्रिकं देहादि गणयेत्सव्ये वामे जीवादि गण्यते ११
मेषगोयमकुलीरमंदिरेष्वंशकेषु परमायुरुच्यते स्थानकं मदसुधास्तदाक्रमात्तत्रकोणभवनेषु तद्वदेत् १२ एवमायुःपरिज्ञानं देहजीवौ प्रकल्प्य च
॥ सव्ये तु प्रथमांशस्तु देह इत्यभिधीयते १३ जीवः सर्वेषु त्वपरो विलोममपसव्यके देहजीवपदा राहुः केतुर्भौमा रविस्थितः १४ तदा तस्मिन्भवेन्मृ
त्युर्देहे रोगः प्रवर्तते देहजीवगृहं यातः सौम्यो जीवस्य भागवः १५ सुखसंपत्करं सर्वशोकरोगविनाशनं मिश्रखेचरसंयुक्ते मिश्रफलमवाप्नुयात्
१६ सिंहावलोकसमये मंडूकगतिसंभवे अपमृत्युभयं तस्मिन्प्रायश्चित्ताद्विमुच्यते १७ मीनात्तु वृश्चिके याते ज्वरं भवति देहिनां पाथोनात्कर्कटे या
ते मातृबंधुवधूमृतिः १८ कटकात्तु हरौ याते व्रणरोगं वदेद्बुधः सिंहात्तु मिथुनं याते स्वस्त्रीव्याधिर्मृतिर्भवेत् १९ पुत्रबंधुमृतिं विद्याच्चापान्मेषं गते पु
नः शुभग्रहे स्मिन्नभयं पापग्रहयुते भयं २० कन्यायाः कर्कटे याते पूर्वभागमहान्भवेत् उत्तरां दिशमाश्रित्य शुभयात्रां गमिष्यति २१ सिंहात्तु मिथुनं याते
पूर्वभागं विसर्जयेत् कार्यारंभं तु नैर्ऋत्यां सुखयात्रां गमिष्यति २२ कर्कटाद्दक्षिणे सिंहे कार्यहानिश्च रोगकृत् दक्षिणां दिशमाश्रित्य पश्चादागमनं भवे
त् २३ मीनात्तु वृश्चिकाक्रांते उद्गच्छति संकटं चापान्मेषभयं यात्राव्याधिर्बंधुमृतिर्भवेत् २४ तत्र संपद्विवाहादि शुभं भवति पश्चिमे शुभारूढे नृप राम
प्रीतिं सर्वसंपत्करं नृणाम् २५ देहो मेषश्चापसिंहाजभानां जीवश्चापो गोवधूनक्रभानां आकोकेरो देहसंज्ञं नृयुग्मं जीवं सव्ये चापसव्ये विलोमात् ५२
२६ मीनो देहो युग्मकोणंगतानां जीवं युग्मागारमाहुर्मुनींद्राः मीनो जीवः कर्कटो देहराशिः सव्ये चक्रे कर्किकीटान्त्यभानां २७ देहजीवसमायुक्ते भौमा
र्किरविभोगिभिः एकैकयोगे मरणं बहुयोगे न संशयः २८ देहयुक्तो महारोगं जीवयुक्तो महद्भयं द्वाभ्यां संयोगमात्रेण हन्यते नात्र संशयः २९ अधिरोगो

भवेद्द्वाभ्यां अपमृत्युस्त्रिभिर्भवेत् चतुर्भिर्मृतिरापन्नादेहजीवं भवेद्यदि ३० युगपद्देहजीवौ तु पापग्रहयुतौ तथा राजचौरादिभीतिश्च द्वाभ्यां मृत्युर्न सं
शयः ३१ अग्निबाधा रवौ विद्याच्चंद्रे ज्वलनबाधकं भौमे शस्त्रकृता पीडा वायुबाधकरं बुधे ३२ गुरौ चोदरबाधा स्यात् शुक्रेऽग्निभयमाप्नुयात् शनौ गुल्मेन वा
धास्या दुराहो विषकृतं रुजं ३३ भ्रातृस्थानगतो जीवो दारस्थानगतः कुजः तथा जन्मगतो मंदो राहु
नेवमराशिगः ३४ चंद्राष्टमगृहं यातः सूर्यो रिःफगृहं गतः बुधः सप्तमभावस्थो भार्गवः शत्रुराशिगः ३५ इत्येवं मरणस्थानं तस्मिन्पापयुते थवा पाप
दृष्टिनीचस्थे दुर्बले दुःखमाप्नुयात् ३६ देहजीवफलं भानुः करोति विविधापदं अर्थनाशं अर्तिज्वरारिजनभीतिपदच्युतिं च पित्तार्तिगुल्मग्रहणीस
यकर्णरोगं पश्वादिबंधुमरणं सहजादिनाशनं ३७ चंद्रः स्वबंधुजनसंगमकन्यकाप्तिमारोग्यभूषणसुखांबरराज्यपूज्यं दानक्रियादिसुरभूसुरपुण्य
तीर्थस्नानार्चनं मृदुसुखान्नसुखं करोति ३८ भौमः करोति तनुतापरुगग्निचौरभीतिं स्वबंधुकलहं सहजादिनाशं क्षेत्रार्थनाशपदविच्युतिपुद्दनीतिगुल्मा
र्शः कुष्ठविषशत्रुभयं कुवृत्तिः ३९ ज्वरमासूरिकापित्तग्रंथिस्फोटं कुजस्य च विषाग्निशस्त्रचौरारिनृपभीतिं वदेद्बुधः ४० सौम्यः करोति सुहृदाप्तमहत्त्वसा
दविज्ञानशीलनिगमागमशास्त्रबोधं स्त्रीपुत्रदारनृपभूषणगोगजाश्वलाभं विवेकधनबुद्धियशोभिवृद्धिं ४१ जीवः करोति विविधार्थसुखं महत्त्वं राज्याभि
षेकमवनिप्रभुपूजनाद्यं स्त्रीपुत्रलाभसुखभूषणभोजनार्थमारोग्यकीर्तिविजयं च परोपकारं ४२ शुक्रः करोति रतिलाभसुखांगनादिचित्रांबरार्थपशु
वाहनरत्नजालं गानक्रियानटनगोष्ठिमहत्त्वतापं सत्कीर्तिदानविभवं सुजनैः समाजं ४३ मंदः करोति कलहं तनुरोगमृत्युबंध्वार्तिमर्थरिपुभूतभयं वि
षार्तिं मानार्थहानिमहिमानकलत्रपुत्रनाशं गृहार्थकृषिवाणिजगोविनाशं ४४ राहोर्देहे भिपीडात्मा बंधुकष्टपरिभ्रमं पक्षघातादिपीडां च राजभीतिं व
देन्नृणां ४५ केतौ चौराग्निपीडादिरक्तस्रावादिपीडनं दारिद्र्यं बंधुनाशं च स्थाननाशं धनक्षयं ४६ ॥ इतिचक्रदशाफलं ॥ लग्नचक्रदशाकाले देहादौ
र्यमहत्सुखं कीर्तिभूषणराज्यार्थसुतदारांबरायती ४७ शुभं क्षेत्रे शुभं सर्वं पापर्क्षे फलमन्यथा तद्वत्पापसमायुक्ते शुभयुक्ते शुभादिकं ४८ स्वक्षेत्रांतु

गमित्रस्थस्वचरेणसमन्वितं विलग्नचक्रपाकेतुराज्यार्थनृपपूजितं ४९ नीचमूढारिराशिस्थखेचरेणसमन्विते पुत्रदारादिनाशंचमिश्रेमिश्र
फलंवदेत् ५० द्वितीयराशिचक्रेतुधनधान्यविवर्द्धनं भोजनंसुतदारादिक्षेत्रगोनृपपूजनं ५१ विद्यासिवाक्पटुत्वंचसज्जोष्ठाकालयापनं शुभर्क्षे
फलमेवंस्यात्पापर्क्षेफलमन्यथा ५२ तृतीयराशिचक्रस्यपरिपाकेमहत्सुखं भक्ष्यभोज्यफलादिंचशौर्यधैर्यमनोजयं ५३ कर्णाभरणवस्त्रादिकंठ
भूषणमाप्नुति अन्नपानादिसंप्राप्तिंशुभराशौशुभंवदेत ५४ चतुर्थराशिचक्रस्यपाकेवाहनभूषणं सीमादिंतीर्थयात्रादिमहज्जननिषेवणं ५५ ।
चित्तशुद्धिंमहोत्साहंस्त्रीसुतादिंकृषिक्रियां बंधुक्षेत्राभिवृद्धिंचगृहलाभंमहत्सुखं ५६ आरोग्यमर्थलाभंचसुगंधांबरभूषणं शुभर्क्षेशोभनंविद्यात्पा
पर्क्षेसर्वनाशनं ५७ सुरराश्यात्मकेचक्रेराज्यादिराजपूजनं स्त्रीसुतादिमहाधैर्यमारोग्यंबंधुपोषणं ५८ अन्नदानयशोलाभंआनंदादिमहोदयं ऽप
कर्तृत्वमर्थादिविवाहंनांबरभूषणं ५९ शुभपापर्क्षजंसर्वंग्रहयोगादिसंभवं पूर्ववद्योजयेत्तत्रचरराशौवदेद्युतिः ६० चक्रस्यषष्ठराशेस्तुपरिपाकेस्नि

जंभयं चोरारिक्षौषिभूपार्तिस्थाननाशंमहद्भयं ६१ प्रमेहगुल्मपांड्वादिग्रहणीक्षयसंभवं अपकीर्तिःकलत्रार्थसुतबंधुविनाशनं ६२ बंधनंनिग
लपादिंऋणदारिद्र्यपीडनं पापर्क्षेफलमेवंस्यात्मिश्रेशुभगृहेसति ६३ कलत्रराशिचक्रस्यपरिपाकेकरग्रहः स्त्रीसुखंपुत्रलाभंचघनसूपगुडा
दिकं ६४ कृषिगोगजभूपादिराजपूज्यमहद्यशः शुभराशौफलंसत्यंशुभखेचरसंयुत ६५ मृत्युचक्रदशाकालेमहद्दुःखंधनक्षयं स्थाननाशंबंधुना
शंगुह्योदरनिपीडनं ६६ दारिद्र्यमन्नविद्वेषमन्नाभावमरोभयं पापर्क्षेपापसंयोगेफलमेवंविनिर्दिशेत् ६७ शुभचक्रदशाकालेशोभनंभवतिध्रुवं पुत्र
मित्रकलत्रार्थकृषिगोगृहभूषणं ६८ सत्कर्मधर्मसंसिद्धिमहज्जनपरिग्रहं शुभराशौशुभंसर्वंपापराशौविपर्ययः ६९ कर्मचक्रदशाकालेराज्यादिं
नृपपूजनं सत्कीर्तिदारपुत्रात्मबंधुसंगमहोत्सवं ७० आज्ञाधरत्वमारोग्यसज्जोष्ठाकालयापनं सत्कर्मफलमैश्वर्यंशुभराशौवदेद्बुधः ७१ लाभच
क्रदशाकालेधनारोग्यभूषणं विचित्रवस्त्रागमनंगृहोपकरणंलभेत ७२ स्त्रीपुत्रबंधुसौख्यादिंऋणद्रव्यायतिंशुभं राजप्रीतिंमहत्संगंप्रवदेत्ति

शुभोदये ७३ अथ चक्रदशाकाले देहार्तिस्वपदच्युतिं चौराग्निनृपकोपादिं बंधुस्त्रीनृपपीडनं ७४ उद्योगभंगमालस्यं कृषिगोभूमिनाशनं रावि
ध्यंकमेवैकल्पं पापर्क्षे तु न संशयः ७५ इति ॥ लग्नादिद्वादशांतानां भावानां फलमीदृशं प्रोक्तमत्र विशेषोस्ति विशेषात्कथ्यतेधुना ७६ तत्तद्रा
शीशवीर्येण पर्यायो यं प्रपद्याजयेत् राशीश्वरे बलयुते स्वोच्चमित्रस्ववर्गके ७७ मित्रान्विते शुभे दृष्टे यत्प्रोक्तं तच्छुभं वदेत् बलहीने नीचस्थे दिनेश
करपीडिते ७८ षष्ठाष्टमव्ययस्थाने पापशत्रुनिरीक्षिते तद्राशिपतुजननेकष्टं राश्युद्भवं फलं ७९ फलं तद्द्विगुणं कष्टं शुभं राश्युद्भवं फलं अधिपस्य
बलं हीनं यदि चानर्थमाप्नुयात् ८० अधिपस्य बलाधिक्यं राश्युद्भवफलं यदि यदि चद्विगुणं सौम्यं फलं त्येवं न संशयः ८१ अधिपचरराशिस्थचरराश्य
शकेपि वा चरराश्युद्भवं चक्रे विदेशगमनप्रदं ८२ यावच्चक्रं तदा तेयं यद्येकस्मिन्चरे सति विदेशगमनं वापि स्वस्थानात्संविनिर्दिशेत् ८३ संज्ञा
ध्यायेच यत्प्रोक्तं कर्मोजीवे च यत्फलं फलमाश्रयजं यच्च स्थानजन्यं च यत्फलं ८४ यत्प्रोक्तं राजयोगादौ चांद्रयोगे च यत्फलं नाभसादिषु यत्प्रोक्तं
शुभपापेक्षणादपि ८५ द्विग्रहादिषु यत्प्रोक्तं ग्रहाणां पूर्वसूरिभिः तद्राशिचक्रकाले तु स्वधिया योजयेद्बुधः ८६ मेषादिराशिचक्रं तु भूमिभागं तु दृष्टि
णे ओनरातोलिचक्रं तु तच्चक्रं तत्र निर्दिशेत् ८७ फलं वा विफलं वापि पापाद्विचरादधः शशिषड्भागतो वापि तद्विभागे विनिर्दिशेत् ८८ यथा त
दशामार्गेण सर्वेषां फलमीदृशं कालचक्रगतिस्त्रेधा निश्चिता पूर्वसूरिभिः ८९ मंडूकगमनं चैव पृष्ठतो गमनं तथा सिंहावलोकनं नाम एनरागमनं भवे
त् ९० पृष्ठतो गमनं चैवं कर्किकेसरिणोरपि मीनवृश्चिकयोश्चापमेषयोः केसरीगतिः ९१ कन्याकर्कटयोः सिंहयुग्मयोर्मंडूकागतिः सिंहावलोकसमये
ज्वरार्तिस्थाननाशं ९२ बंधुस्नेहादिनाशं च समानजनपीडनं जलेवापतनं कूपे विषशस्त्राग्निजं भयं ९३ वाहनात्पतनं वापि दशाच्छिद्रान्विते सति क्रू
रास्तनीचापचयगे च रस्पदशा यदि ९४ दशाच्छिद्रमिति ज्ञेयं प्रवदंति विपश्चितः मंडूकगतसंभूतसमये मरणं गुरोः ९५ पित्रा वा विषशस्त्राग्निज्वरं चौ
राग्निभिर्भयं मंडूकसमये सव्ये समानजनपीडनं ९६ केसरीयुग्ममंडूके मातुर्मरणमादिशेत् मरणं राजभीतिं च सन्निपातमये भयं ९७ सव्यसिंहाव

जा॰पा॰ लोकेनचतुष्पाद्भयमग्निजं ९७ तोगमनेसव्ये धनधान्यपशुक्षयः ९८ पितुर्मरणमालस्ये नत्समानेषुवामृतिः मंडूकगमनेवामेस्त्रीसुतार्ति परि
५५ श्रमं ९९ तापज्वरंमृगाद्भीतिंपदच्युतिमरेभयं सिंहावलोकनेवामेस्थानभ्रष्टंपितुर्मृतिः १०० पृष्ठतोगमनेवापिजलभीतिंपदच्युतिं पितुर्नाशंनृप
कोपंदुर्गारण्याटनंवदेत् १ कालचक्रदशा दस्रानलादितिभुजंगदिनेशभानांपूषासुराजपदविश्वसमीरणानां वाक्यानिसव्यगतिचक्रभवादिका
निचत्वारिसर्वमुनयःप्रवदंतितज्ज्ञाः २ चित्राहिर्बुध्न्यभरणीपूर्वाषाढेन्द्रमंत्रिणां सव्यचक्रोत्यवाक्यानिचत्वारिक्रमशोविदुः ३ द्विदैववरुणमलागार
पितृदानववैरिणं अपसव्यस्यचक्रस्यवाक्यंचादिचतुष्टयं ४ जलेशमित्रेंद्रमृगश्रविष्ठाभगार्यमाशंकरतारकाणां अंत्यानिवाक्यान्यपसव्यजानि
चत्वारिचक्रोपगतानिचाहुः ५ अथसव्यापसव्यचक्रवाक्यानि पौरंगावोमातासहोधी १ नक्षत्रदासीचक्षणगः २ रूपोत्रसुनिधायरंगम् ३ वाणी
चस्थंदधिनक्षत्रम् ४ हंसस्थवशांवरपत्रम् ५ सत्रालीकारगोभीमाच ६ सुदधिनक्षत्रजःसितः ७ वामांगारकोत्रसुनिधिः ८ अपसव्यवाक्यानि॥
प धनक्षत्रपराणमिष १ तासादत्रसुनिधिर्दासा २ चर्मांभागीरायधनसत्रं ३ त्रयामागीस्माभेतासह ४ त्रसुनिधिर्दोससत्संमव ५ गिरायुधनसत्रपरः ६ गो
मांवाचीसरान्नसुत्रे ७ धीजःसितोमिवांगारिका ८ भूतेकविंशाद्गिरयोनवदिक्शोडशाब्धयः सूर्यादीनांक्रमाद्वाराशीनांस्वामिनोवशात् ९ अंत
श्चक्रे दशांदशाब्दंसंगुण्यसर्वायुःसंख्ययाहरेत् लब्धमंतर्दशाज्ञेयावर्षमासदिनादिकाः ७ चक्रशाब्दाद्भुक्तिराशीश्वराब्दं हत्वाततद्राशिमानायुराप्ताः
॥अब्दामासाश्चासरानाडिकाद्यादुःस्थानेशादुःखरोगाकराःस्युः ८ इत्थंमहादायदिनेमहाब्दैःसंगुण्यतत्रांतरदामुदायैः पुनस्तदांतेपरमायुरब्दैर्हृतां राम
दशांतर्दशातादशाख्याः ९ विनाडीकृत्यनक्षत्रंस्वस्वसंवत्सरैःपृथक् दायैःसंगुण्यसर्वायुराप्तसूक्ष्मदशाफलं १० ग्रहवत्सरवासराहतंपरमायुष्यमतो ५४
मितंध्रुवं निजवर्षगुणास्वपाकदाइतिपाकेष्वखिलंविचिंतयेत् ११ ॥इतिश्रीनवग्रहकृपयावैद्यनाथविरचितेजातकपारिजातेसप्तदशोऽध्यायः १७ ॥अ
थदशाफलं दशानुसारेणफलंवदंतिमुनीश्वराजातशुभाशुभंयत् सांशमप्यत्रतथैववक्ष्येभेदंयथाविस्तरतोदशानां १ बलानुसारेणयथाहियोगो

योगानुसारेण दशामुपैति दशाफलैः सर्वफलं नराणां वर्णानुसारेण यथाविभागः २ आदित्यचंद्रकुजराहुसुरेशमंत्रिमंदज्ञकेतुभृगुजा नवक्षु
तिकाद्याः तेनोनयः सितद्युयातरधन्यसेव्यसेनानरादिनकरादि दशाब्दसंख्याः ३ आरोहवीर्याधिकभाववत्तुल्यविंद्वाधिकाः कर्मभवादयस्याः तुं
गादिवर्गोपगतानभोगाः षड्वीर्यवंतश्च शुभप्रदाः स्युः ४ मांदिराशिपतिमांदिभावगाः स्वल्पविंदुरिपुनीचमूढगाः पापखेटयुतभावसंधिगाराशि
संधिलवगास्त्वनिष्टदाः ५ दशापतिर्लग्नगतो यदि स्यात् त्रिषट्दशैकादशगश्च लग्नात् तत्सप्तवर्गोप्यथ तत्र सुहृद्भे लग्नेशभावांशुभदा दशास्या
त् ६ दशादिनाथस्य सुहृद्गृहस्थस्तदुच्चगो वाथ दशाधिनाथात् स्मारत्रिकोणायचयोपगश्चददातिचंद्रः खलु तत्फलानि ७ उक्तेषु राशिषु गतस्य वि
धोः सभावः स्याज्जन्मकालभवमूर्तिधनादिभावः तत्तत्प्रवृत्तिकरदैस्सो कथितो नराणां तद्भाववृद्धिनिकृदथेतरराशिसंस्थाः ८ दशाप्रवेशे स्वगृहादिसं
स्थितिहिमद्युतौ यत्फलमुक्तमार्यैः तदस्य मिंदुर्हिशुभाशुभाख्यं फलं मनोरूपतया ददाति ९ उत्पादितं हि द्युचरस्य पूर्वं शुभाधिकं कष्टफलं हि यत्तत्
तेनानुसारेण दशासु कल्प्यं शरीरभाजाम शुभं शुभं वा १० दृष्टाक्करत्वेहि शुभादिपुंसां फलान्यनिष्टान्यशुभात्करत्वे साम्यं तु मिश्राणि फलानि नू
नं सर्वत्रचैवं परिकल्पनीयं ११ संज्ञाध्याये यस्य यद्रव्यमुक्तं कर्माजीवो यस्य यश्चोपदिष्टः भावस्थानालोकयोगाद्भवं च तत्तत्सर्वं तस्य योज्यं दशायां ॥
१२ शुभफलददशायां तादृगेवांतरात्मा बहु जनयति पुंसां सौख्यमर्थागमं च कथितफलविपाकैस्तर्कयेद्वर्तमानां परिणमतिफलाप्तिः स्वप्नचिंतास्ववी
र्यैः १३ पाकस्वामिनि लग्नगे सुहृदि वा वर्गे स्य सौम्येपि वा मारभ्याशुभदा दशा त्रिदशषड्लाभेषु वा पाकपे मित्रोच्चोपचयत्रिकोणमदने पाकेश्वरस्य स्थितश्चं
द्रः सत्फलबाधनानि कुरुते पापानि चातोन्यथा १४ लग्नादिष्टगृहोपगस्य भवनं न तुंगे सुहृद्भे थवा पाकेशः शुभमित्रवीक्षणयुतस्तत्पाकभुक्तौ शुभं केंद्रे वापदिक्को
णगे नि शुभदः पापास्त्रिषष्ठायगाः सुगाद्योपचयेषु ये बलयुतास्तेषां दशायां शुभं १५ अन्योन्यमित्रग्रहयोर्दशायां भुक्तौ शुभं षड्बलशालिनोस्तु शत्रुग्रहो दुर्ब
लशालिनौ चेत पाकापहारे तु तयोरनर्थः १६ करोति यद्भावगतः स्वपाके तद्भावजन्यं त्वशुभं शुभं वा शुभं शुभं व्योमचरस्य पाके पापस्य दायेत्वशुभं वदंति १७ सा

म्यान्वितग्रहदशातिशुभप्रदास्यात्पापान्वितस्यविफलंपरिपाककाले मिश्रग्रहेणसहितस्यदशापहारे मिश्रंफलंभवतिमिश्रबलान्वितस्य १८
यद्वातुखेटस्यदशापहारंतद्वातुवित्तायदिमाहुरार्याः धातुस्थयंपापवियच्चरस्यपाकेभिवृद्धिंशुभदस्यधातोः १९ सपत्नखेटोपगतस्यपाकेसपत्नवृ
द्धिंसकलार्थनाशं यत्कर्मकर्तृग्रहपाककालेतत्कर्मसिद्धिंप्रवदंतिसंतः २० यत्कार्यकारिद्युचरस्यदायेतत्कार्यसिद्धिंप्रवदेन्नराणां शुभग्रहोसौयदि
कार्यसिद्धिंपापस्तुतत्कार्यविनाशमेव २१ राजस्थानपराजकारकदशाराजप्रसादप्रदादेवव्योमचरस्यपाकसमयेतद्देवताराधनं धर्माधीशदशागमेस
तितत्पाधर्मादिसिद्धिंवदेत कर्मेशस्यदशापहारसमयेयज्ञादिकर्मोत्सवं २२ सत्वादियग्रहपाकभुक्तिसमयेतत्तद्गुणाजायतेजन्मर्क्षादिनवर्क्षगग्रहदशा
कुर्वीतभूतेफलं कर्मर्क्षादिनवर्क्षगस्यबलिनःपाकेभविष्यत्फलंचाधानादिगतस्यसर्वमफलंपाकफलंवावदेत २३ शीर्षोदयगतःखेटःपाकादौफलदो
भवेत् पृष्ठोदयस्थःपाकांतेचोभयोदयगःसदा २४ षष्ठेशस्यदशाविलापकरणीमृत्युविनाशप्रभोरष्टव्योमचरस्यबंधुमरणंपाकेपहारेथवा संपत्सा
धकमैत्रपाःपरममैत्रक्षेमताराधिपावेतेषामपहारभुक्तिसमयेसंपत्समृद्धिंवदेत २५ त्रिमंडलेष्वेथैकस्मिन्पापस्तिष्ठतिदुर्बलः तद्दशायांमृतिंविद्या
त्सस्सौम्यायदिशोभनं २६ राशिसंधिगदायेतुशोकरोगादिपीडनं त्रिंशद्भागमनुक्रांतदशामृत्युफलप्रदा २७ नीचस्थितोजन्मनियोग्रहःस्यात्सचापि
तद्युक्तखगोनशत्रुः दातुंशुभंराहुयुतस्त्वनिष्टंतत्क्षेत्रगस्तद्युतराशिपश्च २८ तत्तद्भावाधीश्वरस्याधिशत्रुर्योवाखेटोबंधुशून्यर्क्षयुक्तः तत्तत्पाके
मूर्तिभावादिकानांनाशंब्रूयादेवमाहुर्मुनींद्राः २९ बाधास्थानगतद्युतग्रहदशाशोकादिरोगप्रदातत्केंद्रस्थदशापहारसमयेदुःखंत्रिदिशादनं अन्यो
न्याष्टमषष्ठगद्युचरयोःपाकापहारेभयंदेशत्यागमनर्थमिष्टशुभयोःसर्वंविमिश्रंवदेत ३० पाकेदोषस्यराजाभवतिधनयशोदानविद्याविनोदैस्व
स्यस्याचारधर्मश्रवणबहुसुखारोग्यवित्तान्वितःस्यात राजप्रीतिंविभूतिंसुखमिहमुदितव्योमवासस्यदायेशांतस्यारोग्यसौख्यंश्रियमथनिपतिप्री
तिमुत्साहमेति ३१ पाकेशक्तस्यविद्याविनयधनतपःसिद्धिधर्मप्रवृत्तिश्चारातिक्षितीशेभयमनुजमृतिःपीडितस्यप्रहृस्य दायेदीनस्यदैन्यंविकलत्व

गदशा शोकरोगप्रदा स्यात् चित्तक्लेशः खलस्य प्रतिदिनमरिभिर्भीतस्वंदस्य भीतिः ३२ विलग्नतारं दुभनामतारा प्रश्नेंदुनक्षत्रगणेषु मध्ये बला
धिकर्क्षेशदशाक्रमेण फलं शुभं वाशुभमादुरार्याः ३३ उत्पन्ननक्षत्रविलग्नतो वा भूयात क्रमेणैव दशाफलानि दशावसानेषु शुभं च सर्वे कावेति सा
मान्यफलं नराणां ३४ जन्मर्क्षात्परतस्तु पंचमगृहादुत्पन्नसंज्ञा दशा स्यादाधानदशाप्यथाष्टमभयात् क्षेमान्महाख्यादशा आसां चैव दशावसा
नसमये मृत्युं वदेत्प्राणिनां दीर्घस्वल्पसमायुषां च धविपतप्रत्यक् दशासु क्रमात् ३५ जन्मनक्षत्रान्महादशा पंचमभावस्फुटतारतः उत्पन्नदशा
॥ आधाननक्षत्रतः आधानदशा॥ अष्टमभावस्फुटनक्षत्रवशात्क्षेमदशा निर्याणदशा ज्ञातान्हिचंद्रर्कशनिस्फुटैक्यतारादि निर्याणदशा प्रकल्प्या
॥ तारेशभाद्गुस्फुटयोगतारपूर्वोदशा रिष्टकरा स्वजन्या ३६ गुलिकदशा गुलिकस्थितनक्षत्राद्दशा तस्य प्रकल्पिता तद्युक्तभवनांशेशो सहकारी च मृत्युदाः
३७ गुलिकस्फुटोदितनक्षत्रवशाद्गुलिकदशा॥ शूलदशा दिनेशाविनशुक्रौ च राजारौ कारकाः स्मृताः कारकस्य त्रिशूलर्क्षे यदाचरति या दशा ३८ विक्र
मा रमाधिपवशाज्ज्ञातस्यायुः पितृकारकौ रविशुक्रौ मातृकारकौ चंद्रकुजौ तत्कारकस्थितगृहादिषु सर्वभेषु चक्रप्रमाणदल्लवत् सरसंयुतेषु वी
र्योन्वितेषु शुभदृष्टियुतेषु सोस्य नीचारिपापयुतभेषु वदंत्यनिष्टं ३९ महादशाविशेषः यत्तारांशगतः शशी तदधिपनाम्नाकिनो वायुतस्तत्पाचकदशा
विशेषफलदा वक्ष्यामि तच्चक्रजं देहे पापयुते तु रोगमधिकं जीवे तु जीवन्भ्रमं दद्याद्घयनयोः सदा बलयुता मृत्युं दशायां नृणां ४० अथांतर्दशाविशेष
फलं पापो विलग्नगृहगोप्यदि तद्दशायां पापापहारसमये बहुशोकरोगं वित्तक्षयं नृपभयं पवनभयं नराणां सौम्यस्य मिश्रमखिलं प्रवदंति संतः ४१ लग्ना
धिपदशाकाले मंदभुक्तौ धनक्षयं दुष्टबंधुविरोधश्च भविष्यति न संशयः ४२ धनाधिपः पापखगो यदि स्यात् शन्यारभोगो शदिनेश्वराणां अंतर्दशायां
धननाशमाहुः पापान्विते तद्भवने तथैव ४३ धनान्वितः पापखगस्तदीशस्यात्तद्दशायां क्षितिपालकोपात् मानार्थनाशं निगलं नराणां स्थानच्युतिं मि
त्रविरोधमेति ४५ पापस्य देहे विक्रमभावनाथे पापान्विते पापवियच्चराणां अंतर्दशायामरिशत्रुचौरैः दुःखं समायाति सभ्रान्वितो वा ४५ दुश्चिक्यभावाधिप

दायकालेमंदारभोगिध्वजभानुभुक्तौ · नाशंवदेत्तत्रसहोदराणांभवेद्विशेषात्त्व हृज्जैर्विरोधः ५६ क्षेत्राधिनाथस्यशुभेतरस्यपापेतुपापग्रहभुक्तिका
ले स्याच्च्युतिंबंधुजनैर्विरोधंकृष्यादिगोवित्तविनाशमाहुः ५७ पापापहारसमयेसुतराशिपस्यपाकेनृपालभयमिष्टसुतार्तिमाहुः सौम्यापहारसम
येसुतवित्तलाभमुर्वीशबंधुजनलालनमिष्टसिद्धिं ५८ षष्ठेशपाकसमयेतुशुभेतराणांभुक्तौनृपानलभयंव्यसनंचरोगं पाककलत्रगृहपस्यखलापहा
रेपत्नीविनाशमटनंचविदोवदंति ५९ रंध्रस्वामिदशागमेरिपुभयंपापापहारेनृणामायुर्वित्तयशोविनाशमटनं स्थानच्युतिंवावदेत् पाकेधर्मगृहाधिपस
मरणंपित्रोरधर्मोपतिंभुक्तौपापवियच्चरस्यनिगलप्राप्तिंचवित्तक्षयम् ५० कर्मेशस्यखलस्यपाकसमयेभुक्तौयदापापिनामिष्टार्तिपदविच्युतिंसुख
यशोहानिंचवित्तक्षयम् मंदारार्कफणीशभुक्तिसमयेलाभेसदापमुखकृष्यादिप्रविनाशनंनृपभयंवित्तस्यनाशंविदुः ५१ अयेशादायरविमंदभौमभु
क्तौकलत्रात्मजबंधुवैरम् बलक्षयंमानधनक्षयंचफणीशभुक्तौविषभीतिमाहुः ५२ अन्योन्यषष्ठाष्टमपाकभुक्तौपदच्युतिंवामरणंनराणां एकस्य
योरंतरदायकालेमृत्युंवदेद्द्वेलशालिनोस्तु ५३ क्रूरग्रहदशाकालक्रूरस्यांतर्दशागमे मरणंतस्यजातस्यभविष्यतिनसंशयः ५४ क्रूरराशिगताःपापाः
शत्रुखेटनिरीक्षिताः शत्रुखेचरसंयुक्तास्तद्दशायांमृतिर्भवेत् ५५ दशाधिपस्ययःशत्रुस्तस्यभुक्तंपतरांतरे मृत्युकालोभवेन्नूनंपापखेटस्यनिश्चयः ५६
खोच्चारिजन्यमशुभस्यदशाप्रवेशोभावादिजंफलमशोभनपाकमध्ये दृष्ट्युद्भवंसकलपापवियच्चराणांपाकावसानसमयेफलमाहुरार्याः ५७ पाक
स्यादौभावजन्यंशुभानांतत्तद्राशिस्थानजंपाकमध्ये दायस्यांतेदृष्टिसंजातमेवंसर्वेतारापाकभेदंवदंति ५८ ॥ इतिनक्षत्रदशासमुदायफलम् ॥
अथांतर्दशाफलानि अथतरणिदशायांचौर्यमुच्चाटनार्थैर्धनमनलचतुष्पात्पीडनंनेत्रतापं उदरभरणशोकंपुत्रदारादिभिःस्याद्गुरुजनपितृनाशो
भूत्यगोवित्तहानिः ५९ दशादशाहतामासाःश्वेकस्थानेविनापरं एकस्थानंत्रिगुणितंदिनान्यंतर्दशाक्रमः ६० रविदशायामंतर्दशाफलानि द्विजभूपति
शस्त्राद्यैर्धनप्राप्तिर्मनोरुजं विदेशवनसंचारंभानोरंतगतेरवौ ६१ बंधुमित्रजनैरर्थप्रमादंमित्रसज्जनैः पांडुरोगादिसंतापंचंद्रेभानुदशांतरे ६२ रक्तको

चनत्रिताप्तिंराजसेनेहेशुभावहं पैत्यरोगादिसंचारंकुजेभानुदशांतरे ६३ अकालेमृत्युसंतापंबंधुवर्गारिपीडनं पदच्युतिंमनोदुःखंरवेरंतर्गतेप्य
हौ ६४ सर्वपूज्यंमुताद्विजंदेवब्राह्मणपूजनं सत्कर्माचारसंद्गोष्ठिंरवेरंतर्गतेगुरौ ६५ सर्वशात्रुत्वमालस्यंहीनवृत्तिंमनोरुजं राजचोरभयप्राप्तिंरवेरं
तर्गतेशनौ ६६ बंधुपीडामनोदुःखंसंत्रासात्हधनक्षयं किंचित्सुखमवाप्नोतिरवेरंतर्गतेबुधे ६७ कंठरोगंमनस्तापंनेत्ररोगमथापिवा अकाल
मृत्युमाप्नोतिरवेरंतर्गतेध्वजे ६८ जलेद्रव्याप्तिमायासंकुस्त्रीजननिषेवणं शुष्कसंवादमाप्नोतिरवेरंतर्गतेभृगौ ६९ दशादौदिननाथस्यपितृरोगं
धनक्षयं सर्वबाधाकरंमध्येदशांतेसुखमाप्नुयात् ७० स्वोच्चेनीचनवांशगस्यतरणेर्दायेपवादंभयंपुत्रस्त्रीपितृवर्गबंधुमरणंकृष्यादिवित्तक्षयं नी
चेतुंगनवांशभास्यचरवेःपाकेनृपालश्रियंसौख्यंयातिदशावसानसमयेवित्तक्षयंवामृतिं ७१ हिमकिरणदशायांमंत्रदेवद्विजाप्तिर्युवतिजनवि
भूतिस्त्रीधनक्षेत्रसिद्धिः कुसुमवसनभूषांगंधनानाधनाढ्योभवतिबलविरोधेचार्थदावातरोगी ७२ अथचंद्रदशायामंतर्दशाफलानि विद्या
स्त्रीगीतवाद्येष्वभिरतिगमनंपट्टवस्त्रादिसिद्धिंसत्संगंदेहसौख्यंनृपसचिवचमूनायकैःपूज्यमानं सत्कीर्तिंतीर्थयात्राविदधतिहिमगुःपुत्रमित्रैःप्रि
यंचक्षोणीगोवाजिलाभंबहुधनविभवंस्वेदशांतर्विपाके १ रोगंविरोधबुद्धिंचस्थाननाशंधनक्षयं मित्रभ्रातृवशात्क्लेशंचंद्रस्यांतर्गतेकुजे २ रिपु
रोगभयात्क्लेशंबंधुनाशंधनक्षयं नकिंचित्सुखमाप्नोतिराहौचंद्रदशांतरे ३ यानादिविविधार्थाप्तिंवस्त्राभरणसंपदः पत्न्यात्कार्यमवाप्नोति
जीवेचंद्रदशांतरे ४ मातृपीडामनोदुःखंवातपैत्यादिपीडनं [illegible]संवादंशनौचंद्रदशांतरे ५ मातृवर्गोद्भवप्राप्तिंविद्वज्जनसमाश्रयं वस्त्रभू
षणसंप्राप्तिंबुधेचंद्रदशांतरे ६ स्त्रीरोगंबंधुनाशंचकुक्षिरोगादिपीडनं द्रव्यनाशमवाप्नोतिकेतौचंद्रदशांतरे ७ स्त्रीधनंकृषिपश्वादिजलवस्त्रा
गमंसुखं मातृरोगमवाप्नोतिभृगौचंद्रदशांतरे ८ नृपप्रापकमैश्वर्यंव्याधिनाशंरिपुक्षयं सौख्यंशुभमवाप्नोतिरवौचंद्रदशांतरे ९ आदौभावफ
लमध्येराशिस्थानफलंविदुः पाकावसानसमयेचांगजंदृष्टिजंफलं १० पाकेभूमिसुतस्यशस्त्रहतभकृद्भूवाहनाद्यैर्धनंभैषज्यान्नृपवंचनेश्चवि

जा·पा विधैः क्रौर्यैर्धनस्यागमं पितासृग्ज्वरपीडनं तु सततं नीचांगनासेवनं विद्वेषं सुतदारबंधुगुरुभिर्दुष्टान्नभोगं विदुः ८१ कुजदशायामंतर्दशाफलानि॥
५७ उत्साधिक्यं सुहृद्द्वेषं भ्रातृपीडा नृपाद्भयं सर्वकार्यार्थनाशं च कुजे कुजदशांतरे १ नृपचोरादिभीतिश्च धनधान्यविनाशनं दुष्टकर्मादिसंसिद्धिं राहौ कुज
दशांतरे २ द्विजमूलाद्धनप्राप्तिं भूलाभं च निरामयं संपूजनं जयं सौख्यं गुरौ कुजदशांतरे ३ बहुदुःखाकरव्याधिमरिचारनृपैर्भयं धनक्षयमवाप्नोति
शनौ भौमदशांतरे ४ वैश्यवर्गाद्धनप्राप्तिं गृहगोधान्यसंपदः शत्रुबाधामनःक्लेशं बुधे कुजदशांतरे ५ कुष्ठिरोगगणं संतापं बंधुसोदरपीडनं दुष्टमान
वशत्रुत्वं केतौ कुजदशांतरे ६ कलत्रभूषणवस्त्रं बंधुवर्गाद्धनागमं स्त्रीजनद्वेष्यनष्टोष्टिं शुक्रे भौमदशांतरे ७ अपवादं गुरुद्वेषं कलहं व्याधिपीडनं आ
त्मवर्गान्मनोदुःखं रवौ भौमदशांतरे ८ नानावित्तसुखं वस्त्रमुक्तामणिविभूषणं निद्रालस्यं मनोद्वेगं चंद्रे भौमदशांतरे ९ भूनंदनस्य पाकादौ मानहानिर्धं
नक्षयः मध्ये नृपाग्निचोराद्यैर्भीतिश्चांते तथा भवेत् १० उच्चस्थितस्य धरणीतनयस्य पाके नीचांशगस्य मरणं सुतसोदराणां नीचेतु तुंगभवनांशगतस्य
दायेकृष्यादिभूमिधनधान्यसुखं वदंति ११ सौख्यादिवित्तस्थितिनाशनं च कलत्रपुत्रादिवियोग दुःखं अतीव रोगं परदेशवासं विवादबुद्धिं कुरुते फणी
शः १२ राहुदशायामंतर्दशाफलानि जायारोगं विवादं च बुद्धिनाशं धनक्षयं दूरदेशाटनं दुःखं राहौ राहुदशांतरे १ व्याधिशत्रुविनाशं च राजप्रीतिं धनाग
मं पुत्रलाभं मनोत्साहं गुरौ राहुदशांतरे २ वातपित्तकृतं रोगं बंधुमित्रादिपीडनं दूरदेशनिवासं च शनौ राहुदशांतरे ३ मित्रबंधुकलत्रादिसंयोगं च धना
गमं राजप्रीतिमवाप्नोति बुधे राहुदशांतरे ४ चौर्यत्वं मानहानिं च पुत्रनाशं पशुक्षयं सर्वोपद्रवमाप्नोति केतौ राहुदशांतरे ५ विदेशाद्वाहनप्राप्तिं छ राम
त्रचामरसंपदः रोगारिबंधुभीतिः स्यात् शुक्रे राहुदशांतरे ६ दानधर्मरितिप्रीतिः सर्वोपद्रवनाशनं संसाररोगसंचारो रवौ राहुदशांतरे ७ सर्वोपद्रव ५७
संयोगः सर्वकार्येषु मूढता वित्तविस्मृतिदोषः स्यात् कुजे राहुदशांतरे ८ कुलीरगोमेषयुतस्य राहोर्दशाविपाके धनधान्यलाभं विद्याविनोदं नृपमा
ननं च कलत्रभृत्यादिसुखं वदंति १० पाथोनमीनाश्वयुतस्य राहोर्दशाविपाके सुतदारलाभं दशाधिपत्यं नरवाहनं च दशावसाने सकलं विनाशं ११

मृगपतिवृषकन्याकर्कटस्थस्य राहोर्भवति च परिपाके राजतुल्यो नृपो वा गजतुरगचमूपः सर्वजीवोपकारी बहुधनसुखशीलः पुत्रदारानुरक्तः १२
दशादौ दुःखमाप्नोति दशमध्ये महत्सुखं दशांते फणिनाथस्य पितृनाशं पदच्युतिं १३ स्थानप्राप्तिं वित्तयानांबराप्तिं राजस्नेहं वित्तशुद्धिं विभूतिं ज्ञानाचा
रं पुत्रदारादिलाभं देवाचार्यः स्वविपाके करोति १०६ गुरुदशायामंतर्दशाफलानि नृपप्रीतिं मनोत्साहं सर्वकार्यार्थसाधनं विद्याविज्ञानमाप्नोति गुरो
गुरुदशांतरे १ द्वेषबुद्धिं मनस्तापं पुत्रमूलाद्धनव्ययं कर्मनाशमवाप्नोति शनौ जीवदशांतरे २ वैश्यवर्गेण वित्ताप्तिं राजस्नेहं सुखावहं सत्कर्माचा
रसिद्धिं च बुधे जीवदशांतरे ३ मुक्ताप्रवालभूषाप्तिस्तीर्थयात्रा धनागतिं गुरुभूपदशादार्तिः केतौ जीवदशांतरे ४ वाहनादिधनप्राप्तिं छत्रचामरवै
भवं स्त्रीपीडा जनविद्वेषं भृगौ जीवदशांतरे ५ शत्रुनाशं जयं सौख्यं मनोत्साहं धनागमं राजप्रसादमारोग्यं रवौ जीवदशांतरे ६ स्त्रीकृतोत्साहमैश्व
र्यं राजप्रीतिं सुखावहं दिव्यवस्त्रविभूषाप्तिं चंद्रे जीवदशांतरे ७ कर्मनाशं च संचारं ज्वरतापमहद्भयं धननाशं निरुत्साहं कुजे जीवदशांतरे ८ सर्वलो
कभयं रोगं सर्वोपद्रवकारणं धनच्छेदमवाप्नोति राहौ जीवदशांतरे ९ नीचांशोपगतः स्वतुंगभवने जीवस्य पाके भयं चोराराति नृपैः कलत्रतनयद्वेषं
करोत्यप्रियं नीचे तुंगनवांशकोपयदि महाराजप्रसादं सुखं विद्यावृद्धियशो धनादिविभवं दशाधिपत्यं तु वा १० शनेर्दशायामजगर्दभोष्ट्रवृद्धांगनाप
क्षिकुधान्यलाभं श्रेणीपुरग्रामजनाधिकाराद्वनं वदेन्नीचकुलाधिपत्यं ११ शनेर्दशायामंतर्दशाफलानि केशादिभिर्व्याधिनिपीडनं च मात्सर्यमाने
र्बहुशोकतापं भूपालचौरैर्धनधान्यनाशं करोति मंदः स्वदशापहारे १ रवितनयदशायां स्वापहारे विरोधं नरपतिजनकोपं प्रेष्यवृद्धांगनाप्तिं पश्चाण
विषभीतिं पुत्रदारादिपीडां ज्वरपवनकफार्तिं मूलरोगं वदंति २ सुखवित्तयशोवृद्धिं सत्कर्माचारसंपदः कृषिवाणिज्यमाप्नोति बुधे मंददशांतरे ३ वातपि
त्तकृतं रोगं कलहं नीचदुर्जनैः दुःस्वप्नभयमाप्नोति केतौ मंददशांतरे ४ बंधुस्नेहं जनप्रीतिं जायावित्तधनागतिं कृष्यादिसुखमाप्नोति भृगौ मंददशांत
रे ५ पुत्रदारविनाशं च नृपचोरादिपीडनं मनोभयमवाप्नोति भानौ मंददशांतरे ६ गुरुस्त्रीमरणं दुःखं बंधुद्वेषं धनागमं वातरोगमवाप्नोति चंद्रे मंददशा

५ द्विजबंधुवशाद्धनं ५

जा·पा· नरे ७ स्थानच्युतिं महारोगं नानाविधमनोभयं सहोदरसुहृत्पीडां भौमे मंददशांतरे ८ सर्वांगरोगसंतापं चोरारिनृपपीडनं धनच्छेदमवाप्नोति
५९ राहौ मंददशांतरे ९ देवभूदेवभक्तिं च राजप्रीतिं महत्सुखं स्थानलाभमवाप्नोति गुरौ मंददशांतरे १० स्वोच्चे नीचनवांशगो रविसुतः कुर्वीत सौख्यं
फलपाकादौ तु दशावसानसमये कष्टं फलं प्राणिनां तुंगांशोपगतः स्वनीचभवने पाकावसाने सुखं दायादौ रिपुचोरभीतिमधिकं दुःखं विदेशाटनं ११
स्वकीयदाये गुरुबंधुमित्रैरर्थार्जनं कीर्तिसुखं करोति दोषं च सत्कर्म हिरण्यपण्यैर्धनायतिं न्यासरुजं कुमारः १२१ बुधदशायामंतर्दशाफलानि॥
विचित्रगृहवित्ताप्तिं राजप्रीतिं महत्सुखं सर्वकार्यार्थसंसिद्धिर्बुधे सौम्यदशांतरे १ बंधुपीडामनस्तापं सौख्यहानिमरेर्भयं कार्यनाशमवाप्नोति के
तौ सौम्यदशांतरे २ गुरुदेवाग्निविप्रेषु दानं धर्मे प्रियं तपः धनवस्त्रविभूषाप्तिं शुक्रे सौम्यदशांतरे ३ वस्त्रभूषणवित्ताप्तिराजप्रीतिं महत्सुखं धर्मश्रव
णमाप्नोति रवौ बुधदशांतरे ४ रोगारातिजनद्वेषं सर्वकार्यार्थनाशनं चतुष्पाद्भयमाप्नोति चन्द्रे सौम्यदशांतरे ५ रोगारिभयनाशं च पुण्यकर्मफलं यशः
॥ राजप्रीतिमवाप्नोति कुजे सौम्यदशांतरे ६ मित्रबंधुधनप्राप्तिं सुखविद्याविभूषणं राजप्रीतिमवाप्नोति राहौ सौम्यदशांतरे ७ इष्टबंधुगुरुद्वेषं धनलाभं
सुतापतिं रोगादिभयमाप्नोति गुरौ सौम्यदशांतरे ८ धर्मसत्कर्मवित्ताप्तिं सुखमल्पजनाधिपः कृष्यादिनाशमाप्नोति शनौ सौम्यदशांतरे ९ उच्चराशिग
तः सौम्यो नीचांशकसमन्वितः करोति कर्मवैकल्यं निजदाये च वर्धनं १० नीचस्थानगतश्चांद्रिस्तुंगांशकसमन्वितः पाकादौ विफलं सर्वं शुभमंते प्रय
च्छति ११ दीनो नरो भवति बुद्धिविवेकनष्टो नानामयाकुलविवर्द्धितदेहतापः पापादिवृद्धिरतिकष्टचरित्रयुक्तः किंचित्सुखी च शशिखिनः परिपाककाले राम
१५१ केतुदशायामंतर्दशाफलानि कलत्रपुत्रमरणं सुखवित्तविनाशनं रिपुभीतिमवाप्नोति केतौ केतुदशांतरे १ स्त्रीपुत्ररोगकलहं बंधुमित्रादिनाश ५९
नं ज्वरातिसारमाप्नोति शुक्रे केतुदशांतरे २ मनोभंगं शरीरार्तिं विदेशगमनं भयं सर्वकार्यविरोधं च रवौ केतुदशांतरे ३ दारापुत्रजनालस्यं धनधान्यवि
नाशनं मनस्तापमवाप्नोति चंद्रे केतुदशांतरे ४ पुत्रदारानुजद्वेषं रोगारिनृपपीडनं बंधुनाशमवाप्नोति कुजे केतुदशांतरे ५ राजचारभयं दुःखं सर्वकार्यवि

नाशनं दु[illegible]मानवसंवादं राहौ केतुदशांतरे ६ देवद्विजगुरुभीतिं राजस्नेहं निरामयं भूपुत्रलाभमाप्नोति गुरौ केतुदशांतरे ७ मनोभयं मनस्तापं स्वबं
धुजनविग्रहं [illegible] देशान्त्यागमवाप्नोति शनौ केतुदशांतरे ८ बंधुमित्रादिसंयोगं पुत्रदारधनागमं विद्यासुखमवाप्नोति बुधे केतुदशांतरे ९ शुभग्रहयुतः
केतुः स्वदशायां सुखप्रदः यदि शोभनसंदृष्टः करोति विपुलं धनं १० सपापः कुरुते केतुः स्वपाके दुष्टमानवैः भीतिं कृत्रिमरोगाद्यैर्व्यसनं धननाशनं ।
११ दशादौ गुरुबंध्वार्तिं दशामध्ये धनाप्तिं दशांते सुखमाप्नोति केतोर्दायफलं त्रिधा १२ स्त्रीपुत्रवित्ताप्तिमतीव सौख्यं सुगंधमाल्यांबरभूषणाप्तिं या
नादिभाग्यं नरपालतुल्यं यशः स्वपाके भृगुजः करोति १५४ शुक्रदशायामंतर्दशाफलानि शय्यास्त्रीधनवस्त्राप्तिं धर्मादिसुखसंपदः रिपुनाशं यशो
लाभं शुक्रे शुक्रदशांतरे १ शिरोदराक्षिरोगं च कृषिगोवित्तनाशनं नृपक्रोधमवाप्नोति रवौ शुक्रदशांतरे २ पित्तासृगक्षिरोगं च मनोत्साहं धनागमं दा
रभूलाभमाप्नोति कुजे शुक्रदशांतरे ४ नीलवस्तुधनप्राप्तिं बंधुद्वेषं सुहृद्भयं अग्निबाधामवाप्नोति राहौ शुक्रदशांतरे ५ धनवस्त्रविभूषाप्तिं धर्मो
चारं सुखावहं स्त्रीसुतार्तिं च वैषम्यं गुरौ शुक्रदशान्तरे ६ वृद्धस्त्रीजनसंभोगं गृहक्षेत्रधनागमं शत्रुनाशमवाप्नोति मंदे शुक्रदशांतरे ७ सुतमित्रसु
खार्थाप्तिं नृपप्रीतिं महत्सुखं शुभमारोग्यमाप्नोति बुधे शुक्रदशांतरे ८ कलहं बंधुनाशं च शत्रुपीडां मनोभयं धनच्छेदमवाप्नोति केतौ शुक्रदशां
तरे ९ उच्चराशिंगतः शुक्रो नीचांशकसमन्वितः स्वपाके धननाशं च कुर्वीत पदविच्युतिं १० भार्गवो नीचराशिस्थः स्वोच्चांशकसमन्वितः स्वपा
के कृषिवाणिज्यं धनलाभं प्रयच्छति ११ सम्यग्बलिनः स्वतुंगभागे संपूर्णबलवर्जितस्य रिक्ता नीचांशगतस्य शत्रुभागे ज्ञेयानिष्टदशाफलप्रसूतौ
१६६ तत्तद्भावार्थकामेशदशास्वंतर्दशासु च तत्तद्भावविनाशः स्यात्तच्युतेषु स्वकारकैः १६७ त्रिकोणधनलाभस्थाबलिनो यदि शोभनाः स्वदशांतर्दशा
काले कुर्वंति विपुलं सुखं १६८ अष्टादशाख्यानि समानि होरासमुद्धृते जातकपारिजाते राशिस्वरूपादिदशाफलांतं प्रोक्तं मया भानुमुखप्रसादात् १६९

जा॰पा॰ ५९ ॥इतिनवग्रहकृपयावैद्यनाथविरचितेजातकपारिजातेअष्टादशोऽध्यायः१८॥शाखाभिरष्टादशसंख्यकाभिरध्यायरूपाभिरतिप्रकाशः ज्योतिर्मयः सर्वफलप्रधानःसंकीर्त्तितोजातकपारिजातः१ उक्तंराशिगुणालयंग्रहगतिस्थानस्वभावाकृतिराधानादिसमस्तजीवजननंबालाद्यनिष्टाकरः आयु र्जातकभंगयोगजविधिःश्रीराजयोगादिजंद्वित्र्यादिग्रहयोगजःशुभकरोमाद्यब्दजंचक्रमात् २ पश्चादष्टकवर्गबिंदुगणितंहोराधनस्थानजंदुश्चि क्याचनिभावजंसुररिपुस्थानप्रयुक्तंफलं कंदर्पोऽश्मधर्मराशिजनितंव्यापारलाभांत्यजंनारीजातकलक्षणंनिगदितंचेद्दंदशांतर्दशा ३ श्रीविद्याधि र्वैकरादितनयःश्रीवैद्यनाथःसुधीरादित्यादिसमस्तखेटकृपयाविद्वज्जनप्रीतये होरासिंधुसमुद्धृतामृतमयीमष्टादशाध्यायिनींचक्रेजातक ज्ञानसारणिंगीतांस्तुकश्लोकिनीम् १७३ ॥इतिश्रीजातकपारिजातःसमाप्तः॥शुभम्॥ श्रीसाम्बसदाशिवायनमः।श्रीरामचंद्रायनमः॥ ॥

वाराणसीप्रसादस्यनियोगेनप्रयत्नतः काशीसंस्कृतमुद्रायामंकितोऽयंशिलाक्षरैः॥१॥ श्रीकाशीजीमेमहल्लेहौदकटोरा श्रीयुतबाबू वाराणसीप्रसादजीकेमकानमें काशीसंस्कृतमुद्रायंत्रमेंछपी जिनकोलेनाहोयउनको उक्तस्थानमें श्रीबाबूवाराणसीप्रसादजीकेपासयाक चौरीगलीमेंभाईप्रतापसिंहजीकेदुकानपरमिलेगी॥ श्रीसंवत १९४१

॥ इति जातकपारिजातः समाप्तः ॥